Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8319

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

# वैदिकसाहित्ये प्रातिशाख्यग्रन्थाः तेषां प्रयोजनश्च

## Prātiśākhyas and their utility in Vedic Literature

**Arpita Das, Dr. Laxminarayan Pandey**

Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

**संक्षिप्तसारः** - विश्वस्य प्राचीनतमा हृदयग्राहका, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा । वैदिक-संस्कृतभेदेन सा द्विधा । तयोर्वैदिकभाषा एव प्राचीना । ऋक्-साम-यजुः-अथर्वभेदेन वेदस्य खलु चातुर्विध्यं प्रतिपादितमृषिभिः ।

***ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च*** इति श्रुतिवाक्यानुसारेण षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्चेति । अङ्गं नामोपकारकः । अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि । यानि वस्तूनि वेदानां स्वरूपज्ञाने सहायकानि भवन्ति तान्यङ्गानि कथ्यन्ते । षड्वेदाङ्गानि तत्र सन्ति । तानि तु – शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दः-ज्योतींषि चेति । उक्तम् - ***शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां च यः । ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ।।*** इति ।

यद्यपि षट्सु वेदाङ्गेषु प्रातिशाख्यस्यान्तर्भुक्तिर्न स्यात्तथापि ग्रन्थोऽयं वैदिकसाहित्यजगति शिक्षावेदाङ्गवदपरिहार्य इति निश्चप्रचं वक्तुं युज्यते । प्रतिशाख्यग्रन्थेनापि वेदमन्त्रस्य छन्दः-मात्रा-उच्चारणप्रकिया-स्वर◌ादीनां ज्ञानं लभते । प्रतिवेदस्य शाखाभेदेन बहवः प्रातिशाख्यग्रन्थाः सन्ति । तेषां सर्वेषामेव प्रातिशाख्यग्रन्थानां परिचयः, परवर्तिसाहित्ये तेषां प्रातिशाख्यानां प्रभावस्तथा तेषां प्रयोजनप्रतिपादनमेव गवेषणापत्रस्यास्य विषय इति शम् ।

**सूचीमुखशब्दाः - संक्षिप्तसारः, अवतरणिका, वैदिकसाहित्ये प्रातिशाख्यानां परिचयः, प्रतिवेदानां प्रातिशाख्यग्रन्थास्तेषां संक्षिप्तपरिचयश्च, तेषां प्रातिशाख्यानां परवर्तिसाहित्ये प्रभावः तथा प्रयोजनः, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी**

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**अवतरणिका –**

ऋग्यजुस्सामाथर्वसु चतुर्षु वेदेष्वेव वेदशब्दस्य समानरूपेण प्रयोगो भवति। त इमे वेदाः समग्रस्यार्थस्य शास्त्रस्य मूलभूताः सन्ति । तत्र धार्मिकानां वैदिकानां क्रियाकलापानां प्रतिपादकाः ब्राह्मणग्रन्थाः. आरण्यकग्रन्थाश्च सन्ति। ब्रह्मज्ञानस्य प्रतिपादिकाः उपनिषद्ग्रन्थाः सन्ति। सामाजिकव्यवस्थायाः निश्चितरूपेण निर्णायकानि कल्पयूत्राणि सन्ति । भाषाविज्ञान्स्य प्रतिपादकानि च सन्ति शिक्षा-व्याकरण-छन्दः-निरुक्तानि । शुभाशुभकालस्य च निर्णायकमस्ति ज्योतिश्शास्त्रम्। इमानि सर्वाणि शास्त्राणि वेदादेवोद्भूतानि सन्ति।

अथर्ववेदीये मुण्डकोपनिषदि परापरविद्ययोः वर्णनं समुपलभ्यते । चत्वारो वेदाः ऋग्यजुस्सामाथर्वाख्या शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतींषि च अपराविद्याया अन्तर्गतानि सन्ति । उपनिषत्सु एव पराविद्या समुपवर्णिता। तथा चाह श्रुतिः – ***तस्मै स होवाच - द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च। तत्रापरा – ऋग्वेदो यदुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा – यया तदक्षरमधिगम्यते*** [1] इति।

अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि इत्यस्माभिर्ज्ञायते सर्वैः । वेदशास्त्रस्य अर्थावबोधाय वेदाङ्गानां माहात्म्यमपरिहार्यम्। वेदाङ्गानि खलु षट्शास्त्रशब्देनाभिधीयन्ते। तानि च षट् शास्त्राणि – शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतींषि सन्ति । ऋग्वेदान्तर्गतायां पाणिनीयशिक्षायां रूपकेणैकेन तेषां वेदाङ्गानामवयवत्वं कल्पितम् । तद्यथा – ***छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥***

***शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥*** [2] इति।

स्वाध्यायाभिधानपर्यायपरको वेदः खलु ऋगादिभेदेन चतुर्धा प्रविभक्तः प्रत्येकं विविधशाखासमाहारात्मकः, स्वकुलपारम्पर्यागतत्वेन शिष्यप्रशिष्यपरम्परया सहस्रसः शाखानां सम्भवात् । किन्तु मौलिकविषयप्रतिपाद्यापेक्षया ऋगादिभेदेन चातुर्विद्यात् शाखाविशेषे ऊहापोहसम्पादनाय तदीयं विशिष्टं साङ्गोपाङ्गमध्ययनं प्रस्तौति प्रातिशाख्यं नाम। शाखागतविचारेण प्रतिवेदं प्रातिशाख्यानां नानाविध्यात् तत्तद्विषयपरिकल्पनमेतेषु सुविदितमेव। न हि वेदाङ्गं प्रातिशाख्यम्, न हि वेदाङ्गं प्रतिशाख्यम्, समुदायेन शिक्षादिवेदाङ्गानामालोचनाद् वेदाङ्गतरत्वमेव परिगणनसापेक्षत्वात्। शीक्षादीनां पृथक्त्वेन वेदाङ्गत्वात् प्रातिशाख्ये समुदायेन तत्तद्विषयपर्यालोचनत्वात् शास्त्रस्यास्य वेदाङ्गत्वाभावेन परिकीर्तितं वेदाङ्गेतरत्वमेव।

---

[1] मुण्ड.– 1.1.4-5

[2] पा.शि. - 41-42

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

अतिगम्भीरस्य वेदार्थस्य सम्यगवबोधनाय शिक्षादीनि षड् वेदाङ्गानि प्रवर्तितानि आचार्यैः । तत्र शिक्षा नाम स्वरव्यञ्जनोच्चारणपदेशकं शास्त्रम् । व्याकरणं तु शब्दार्थव्युत्पत्तिकरं शास्त्रम् । गायत्र्यादीनां छन्दसां ज्ञानशास्त्रमिति छन्दः । तत्र शौनकादय आचार्या वेदार्थविदो वेदार्थविविदिषूणां सुहृदो भूत्वा पुरुषशिक्षायै प्रतिवेदं प्रतिसंहितं विरचयामासुः विविधानि प्रातिशाख्यानि । न हि प्रातिशाख्यं वेदाङ्गेष्वन्तर्भुक्तमिति पूर्वमुल्लिखितम् । न ह्येकेन वेदाङ्गेन सम्भवति प्रातिशाख्यगतविषयालोचनम् । शिक्षा-छन्दो-व्याकरणानि त्रीणि वेदाङ्गानि युगपदेव आलोचितानि प्रातिशाख्येषु । त्रिभाष्यरत्नकारमते प्रातिशाख्यं नाम शास्त्रमुपाङ्गेषु पर्यवसितं *छन्दोभाषासमन्वितम्* इत्येवम् । प्रतिपदानुपदयोरुपाङ्गान्तर्भावे तु प्रातिशाख्यस्य छन्दोभाषापरवेदलक्षणपर्यायाभिधानेन परिगणितमुपाङ्गत्वम् । व्याकरणप्रधानत्वादस्य शास्त्रस्य विषयः प्रतिफलति । मूलीभूतं व्याकरणं पूर्वशास्त्रम् । तस्मिन् कल्पो न विधीयते । व्याकरणप्रधानं ह्येतच्छास्त्रम् । ततो वैयाकरणेभ्योऽन्ये शिक्षाकारा इह शिक्षागणोपदेशेन भजन्ते व्यपदेशस्य साम्यम् । शिक्षादिना येन केनापि वेदाङ्गेन सामान्येन सम्भवति प्रातिशाख्यगतविषयायोचनम् । शिक्षादिषु वेदाङ्गेषु सामान्यविधयो निर्दिष्टाः, प्रातिशाख्येषु तु तदपवादविधयः । उत्सर्गापवादयोरपवादविधिर्बलीयान् इति न्यायेन प्रातिशाख्यशास्त्रस्य अपवादविषयपरत्वात्, शिक्षादिभ्यो वेदाङ्गेभ्यो विवेचितं बलीयस्त्वम् । अत एव वेदाङ्गतरत्वेन किञ्चिदनितरसाधारणं प्रातिशाख्यं नामेति शास्त्रम् ।

चतुर्दशविद्यास्थानविभागेऽपि तस्य प्रातिशाख्यस्य अन्तर्भुक्तिर्नास्ति । चतुर्दशविद्यास्थानविभागस्तु –

***शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यातिषं तथा । छन्दश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ।***
***अङ्गानि वेदश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥***
***आयुर्वेदो धनुर्वेदो गान्धर्वं चेति ते त्रयः । अर्थशास्त्रं चतुर्थं तद्विद्या ह्यष्टादश स्मृताः ॥*** इति ।

परे पुनर्व्याकरणे प्रातिशाख्यस्यास्यान्तर्भुक्तिर्भवति । कृष्णयजुर्वेदीये तैत्तिरीयप्रातिशाख्ये *न पूर्वशास्त्रे न पूर्वशास्त्रे*[3] इति सूत्रे वैदिकाभरणम्- इति व्याख्यायामुक्तम् – *अस्य शास्त्रस्य मूलभूतं व्याकरणं पूर्वशास्त्रमित्युच्यते । ... व्याकरणप्रधानं ह्येतच्छास्त्रम् ...* इति । शुक्लयजुर्वेदस्य प्रथमाध्यायस्य वृद्धं वृद्धिः [4]– इति अन्तिमे सूत्रे प्रातिशाख्यमाहात्म्यं परिकीर्तितं तत्रभवता भाष्यकारेणोवटाचार्येण – *वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य, शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते । अत एव हेतोः शिष्याणामेतच्छास्त्रश्राविताणां वृद्धिर्भवति* इति ।

[3] तै.प्रा – 19.5
[4] शु.प्रा – 1.169

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8319

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

एवम्भूतस्य प्रातिशाख्यस्य आलोचनमेवास्माकं गवेषणापत्रस्य मुख्यविषय इति।

**वैदिकसाहित्ये प्रातिशाख्यानां परिचयः –**

वैदिकसाहित्यपर्यालोचनायाः विशेषतो वैदिकव्याकरणपर्यालोचनायाः क्षेत्रेषु प्रातिशाख्यं खल्वेकमनवद्यशास्त्रं पारिभाषिककार्यक्रमप्रसङ्गात् । प्रातिशाख्यपदं चैवं व्युत्पादयन्ति शाब्दिकाः । यथा माधवीयधातुवृत्तौ भ्वाद्यन्तर्गते शाखृधातौ – *शाखायां शाखायां प्रतिशाखम् । प्रतिशाखं भवं प्रातिशाख्यम्* इति । प्रतिवेदगतशाखाभेदेन वर्तन्ते विविधानि प्रातिशाख्यानि। कतिपय नामानि पूर्वे समुल्लिखितानि। शाखा नाम स्वकुलपारम्पर्यागतस्वाध्यायशब्दवाच्यवेदाभिधानपर्यायपरा । *अव्ययीभावाच्च*[5] इति सूत्रेण भवार्थे ञ्य-प्रत्ययेन शब्दस्यास्य प्रातिशाख्यस्य व्युत्पत्तिः प्रतिपादिता। शाखाविशेषमधिकृत्य तदीयशब्दोच्चारणप्रक्रिया-सन्धि-छन्द-स्वरादीनामनुशासनाय प्रवृत्तं शास्त्रं प्रातिशाख्यमेवेति।

चतुर्षु वेदेषु बहवः प्रातिशाख्यग्रन्थाः सन्ति। तेषां परिचय एवात्र प्रस्तूयते -

**प्रतिवेदानां प्रातिशाख्यग्रन्थास्तेषां संक्षिप्तपरिचयश्च -**

ऋग्यजुस्सामाथर्वभेदेन वेदास्तु चत्वार इति अस्माभिः सर्वैरेव ज्ञायते । तत्र यजुर्वेदस्य कृष्ण-शुक्लभेदेन द्विविधत्वमपि अङ्गीकृतं विद्वद्भिः। तदर्थं वेदा खलु पञ्चविधा इति कथितुं युज्यते। इदानीम् -

**ऋग्वेदस्य** प्रातिशाख्यग्रन्थः – ***ऋग्वेदप्रातिशाख्यम्***।
**सामवेदस्य** प्रातिशाख्यग्रन्थाः – ***सामतन्त्रम्, पुष्पसूत्रम्, ऋकतन्त्रम्, अक्षरतन्त्रं*** चेति।
**कृष्णयजुर्वेदस्य** प्रातिशाख्यग्रन्थः – ***तैत्तिरीयप्रातिशाख्यम्***।
**शुक्लयजुर्वेदस्य** प्रातिशाख्यग्रन्थः – ***वाजसनेयि-प्रातिशाख्यम् शुक्लयजुर्वेद-प्रातिशाख्यं*** वा।
**अथर्ववेदस्य** प्रातिशाख्यग्रन्थौ – ***अथर्ववेदप्रातिशाख्यम्, चतुरध्यायिका*** चेति।

**प्रातिशाख्यग्रन्थानामेतेषां संक्षिप्तपरिचयः**

ऋग्यजुस्सामाथर्वेषु चतुर्षु वेदेषु ऋग्वेदस्य प्रातिशाख्यम् एव *ऋक्प्रातिशाख्यम्* । ग्रन्थस्यास्य रचयिता एव आचार्यः शौनकः । ग्रन्थस्यास्य भाष्यकार उवटाचार्यः, भाष्यस्य नाम एव *उवटभाष्यम्* । प्रतिवेदस्य प्रातिशाख्यग्रन्थो विद्यते । तत्र पौर्वापर्यस्तु इत्थम् – 1. ऋग्वेदप्रातिशाख्यम् 2. तैत्तिरीयप्रातिशाख्यम् 3. वाजसनेयिप्रातिशाख्यम् 4. शौनकीया चतुरध्यायिका 5. ऋक्तन्त्रम् 6. अथर्ववेदप्रातिशाख्यम् इति।

[5] अ. – 4.3.59

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**ऋग्वेदप्रातिशाख्यम् -** ऋग्वेदस्य शाकलशाखायाः प्रातिशाख्यमिदम् ऋग्वेदप्रातिशाख्यम्। आचार्यः शौनक एव तस्य प्रातिशाख्यस्य कर्ता । उपलब्धेषु प्रातिशाख्यग्रन्थेषु प्रातिशाख्यमिदम् आकारेण विशालः प्राचीनविषयविवेचनदृष्ट्या महत्त्वपूर्णं च विद्यते। ग्रन्थस्यास्य रचना छन्दोबद्धा अस्ति।

ग्रन्थस्यास्य **प्रथमसंस्करणमेव** 1859 ख्रीष्टाब्दे **एम.ए.रेग्नियर**-महोदयेन प्रस्तूयते। तत्र ग्रन्थस्थितानां सूत्राणां फ्रेञ्च-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता एम.ए.रेग्नियर-महोदयेन । ग्रन्थस्यास्य **द्वितीयसंस्करणमेव** 1869 ख्रीष्टाब्दे **मैक्समूलर**-महोदयेन प्रस्तूयते । तत्र ग्रन्थस्थितानां सूत्राणां जर्मान-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता मैक्समूलर-महोदयेन। पुनः, ग्रन्थस्यास्य **तृतीयसंस्करणमेव** 1869 ख्रीष्टाब्दे **सत्यव्रतसामश्रमी**-महोदयेन प्रस्तूयते । पुनः, ग्रन्थस्यास्य **चतुर्थसंस्करणमेव** 1903 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं पण्डित-**युगलकिशेर-व्यास**-महोदयेन तच्छिष्येन पण्डित-**प्रभुदत्तशर्म**णा च कृतम् । पुनः, ग्रन्थस्यास्य **पञ्चमसंस्करणमेव** 1905 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं **हितव्रत-सामकण्ठ**-महोदयेन कलिकातातः कृतम्। तदनन्तरं डा. **मङ्गलदेव-शास्त्री** महोदयेन उवटभाष्यसहितस्य ऋक्प्रातिशाख्यस्य खण्डत्रयेण अत्युत्तमं संस्करणमेकं प्रकाशितम् । तत्र प्रथमे खण्डे प्रातिशाख्यस्यास्य कर्ता, भाषा, रचनाशैली आदि प्रतिपादिता । द्वितीये खण्डे उवटभाष्यसहितानि प्रातिशाख्यास्यास्य सूत्राणि समुल्लिखितानि । तृतीये खण्डे तु ग्रन्थस्यास्य आङ्गलभाषायाम् अनुवादः टिप्पनी च सन्निवेशिता तत्रभवता ग्रन्थकारेण । तदनन्तरं 1930 ख्रीष्टाब्दे अध्यापक-**सिद्धेश्वर-भट्टाचार्य**-महोदयस्य उवट-भाष्य-सहितम् *ऋग्वेदप्रातिशाख्यम्* वाराणस्या: काशी हिन्दू विश्वविद्यालय शोध-प्रकाशनतः प्रकाशितोऽभूत् । तदनन्तरं अध्यापक-**वीरेन्द्रकुमाक-वर्मा**-महोदयेन अनुवादितं परिष्कृतम् उवटभाष्य-संवलितम् ऋद्वेदप्रातिशाख्यम् प्रकाशितं जातं चौखम्बा-संस्कृत-प्रतिष्ठानतः 1986 ख्रीष्टाब्दे । अध्यापक-**व्रजबिहारी-चौवे**-महोदय-प्रणीतम् *ऋग्वेगप्रातिशाख्य* (पटल १ – ४) भारतीय विद्या प्रकाशन, दिल्लीतः 1986 ख्रीष्टाब्दे प्रकाशितोऽभूत्। *शौनकीय ऋग्वेगप्रातिशाख्य* (प्रथमतश्चतुर्थपटलं यावत्, षोडशपटलञ्च) अध्यापक-**तारकनाथ-अधिकारी**-महोदयेन सम्पादितं कोलकातायाः संस्कृत-वुक-डिपोतः 2007 ख्रीष्टाब्दे। तत्परं, *शौनकविचरितम् ऋग्वेदप्रातिशाख्यम्, पशुपतिशास्त्रिकृतटीकासमेतम्* प्रकाशितं सम्पादकेन अनुवादकेन व्याख्याकारेण अध्यापक-**अमरकुमार-चट्टोपाध्याय**-महाभागेन कोलकातायाः संस्कृत-पुस्तक-भाण्डारतः 2008 ख्रीष्टाब्दे।

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

प्रातिशाख्येऽस्मिन् अष्टादशपटलानि सन्ति। विषयानुसारेण प्रतिपटलस्य नामकरणं कृतं तत्रभवता ग्रन्थकारेण शौनकाचार्येण। अत्र अष्टादशपटलानां नामानि उल्लिख्य तेषां विषयाः समुपवर्णिताः सन्ति। तद्यथा –

**प्रथमपटलम् (संज्ञा-परिभाषा-पटलम्)** - प्रातिशाख्यप्रयोजनं, समानाक्षरम्, सन्ध्यक्षरम्, स्वरः, व्यञ्जनम्, स्पर्शः, वर्गः, अन्तःस्थः, सोष्मः, अघोषः, ऊष्मः, अनुनासिकः, ह्रस्वः, दीर्घः, गुरुः, ह्रस्वदीर्घप्लुतानामुच्चारणकालः, रक्तः, संयोगः, नामिः, प्रगृह्यम्, रेफी इत्यादयः।

**द्वितीयपटलम् (संहिता-पटलम्)** – संहिता, संहितास्वरूपम्, विवृत्तिस्वरूपम्, विवृत्तिकालः, विविधाः सन्धयः, प्रकृतिभावः, निपातनानि, अनानुपूर्व्यसंहिता, दीर्घा विवृत्तयः इत्यादयः।

**तृतीयपटलम् (स्वर-पटलम्)** – स्वराणां संख्या उच्चारणप्रकारश्च, स्वराक्षरयोर्धर्मधर्मिसम्बन्धः, सन्धौ स्वरितनिष्पत्तिः, स्वरितस्य उच्चारणप्रकारः, पदे उदात्तपूर्वस्वरितम्, पदे जात्यस्वरितम्, पदे प्रचयस्वरस्य उच्चारणप्रकारः, सन्धिजस्वरितानां संज्ञा, परिग्रहे स्वरनिरूपणम्, अवग्रहे स्वरनिरूपणम् इत्यादयः।

**चतुर्थपटलम् (सन्धि-पटलम्)** – विविधाः सन्धयः, नकारस्य प्रकृतिभावः, पदान्ते आकारस्य अकारः, विसर्जनीयसन्धिविषये निपातनानि इत्यादयः।

**पञ्चमपटलम् (नति-पटलम्)** – नतिसंज्ञा, नतिसन्धि इत्यादयः।

**षष्ठपटलम् (ध्वन्यागम-पटलम्)** – क्रमः, अभिनिधानम्, यमः, ध्रुवसंज्ञो नादः, स्वरभक्ति इत्यादयः।

**सप्तमपटलम् (प्लुति-पटलम्)** – सामवशसन्धिः, प्लुति इत्यादयः।

**अष्टमपटलम् (प्लुति-पटलम्)** – अन्तःपादं पदान्तह्रस्वस्य दीर्घभावः, अष्टाक्षरे पादे षष्ठाक्षरस्य दीर्घभाव इत्यादयः।

**नवमपटलम् (प्लुति-पटलम्)** – पूर्वपदान्ते ह्रस्वस्य दीर्घभावः, अवग्रहरहितेषु पदेषु पद्येषु चान्तर्ह्रस्वस्य दीर्घभावः।

**दशमपटलम् (क्रम-पटलम्)** – क्रमपाठस्य सामान्यनियमः, क्रमपाठे पदविशेषाणां परिग्रहः, उपस्थितः, स्थितः, स्थितोपस्थितः, परिग्रहविषये अन्ये नियमाः, परिग्रहे सन्धिविशेषाणां प्रकृतिभावः इत्यादयः।

**एकादशपटलम् (क्रम-हेतु-पटलम्)** – क्रमपाठस्य सामान्यस्वरूपम्, क्रमपाठे विकृतरूपविषयकनियमः, उपस्थितः, स्थितः, स्थितोपस्थितः, परिग्रहविषये अन्ये नियमाः, परिग्रहविषयेऽपवादः, परिग्रहस्योपयोगः, शास्त्रविहित-क्रमपाठस्य प्रशंसा इत्यादयः।

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8319

IJAMSR

**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**द्वादशपटलम् (सीमा-पटलम्)** – अपदान्तीयवर्णाः, पदादौ गन्तुमनर्हा वर्णा इत्यादयः।

**त्रयोदशपटलम् (शिक्षा-पटलम्)** – वर्णनिष्पत्तौ बाह्यप्रयत्नः, वर्णनिष्पत्तौ आभ्यन्तरप्रयत्नः, वर्णनिष्पत्तौ सामान्यवर्णनम्, वर्णाः शाश्वतिका इति मतन्यासः, वर्णगुणोपसंहारः, समापाद्यस्वरूपम्, ऋकार-ॠकार-ऌकार-स्वरूपम्, सन्ध्यक्षराणां स्वरूपम्, सप्त यमास्तेषां स्वरूपम् इत्यादयः।

**चतुर्दशपटलम् (उच्चारणदोष-पटलम्)** – वर्णदोषाणां सामान्यस्वरूपम्, वर्णानां सामान्यदोषाः, स्वराणां दोषाः, वर्गीयवर्णानां दोषाः, रेफलकारयोर्दोषाः, यमस्य दोषाः, विसर्जनीयस्य दोषः, अनुनासिकस्थाने अनुस्वारोच्चारणम्, ऋकारॠकारयोर्दोषः, अघोषाणां दन्तानां दोषः, अविद्यमानस्य यकारस्योच्चारणम्, विद्यमानस्य यकारस्य वकारस्य वा लोपः, अनुनासिकैः स्वराणाम् अनुनासिकता इत्यादयः।

**पञ्चदशपटलम् (ओंकार-पटलम् वेदाध्ययनपटलम् वा)** – वेदाध्ययने गुरुशिष्ययोरुपवेशनप्रकारः, गुरवे शिष्यप्रार्थना, ओंकारस्य महिमा तदुच्चारणप्रकारश्च, वेदाध्ययने गुरुप्रक्रिया शिष्यप्रक्रिया च इत्यादयः।

**षोडशपटलम् (छन्दः-पटलम्)** – प्रजापतेर्देवानामसुराणाञ्च सप्त छन्दांसि, ऋषीणां छन्दांसि, यजुषां साम्नामृचां ब्रह्मणश्च छन्दांसि, ऋषीणां छन्दसामधिकारः, गायत्री तद्भेदाश्च, उष्णिक् तद्भेदाश्च, अनुष्टुप् तद्भेदाश्च, बृहती तद्भेदाश्च, पङ्क्तिः तद्भेदाश्च, त्रिष्टुप् तद्भेदाश्च, जगती तद्भेदाश्च, अतिच्छन्दसां द्वौ वर्गौ, तयोः उदाहणानि इत्यादयः।

**सप्तदशपटलम् (छन्दः-पटलम्)** – छन्दसां केचिद्विशेषाः, निचृत्संज्ञा, भूरिक्संज्ञा, स्वराट्संज्ञा, विराट्संज्ञा, छन्दसां देवताः, छन्दसां वर्णाः, पादानां विभागप्रकारः, ऋग्वेदे बृहत्तमा ऋक्, ऋग्वेदे बहुपादाऽपि लघुतमा ऋक् इत्यादयः।

**अष्टादशपटलम् (छन्दः-पटलम्)** – प्रगाथाः, अक्षरसंज्ञा, अनुस्वारव्यञ्जनयोः स्वराङ्गत्वविचारः, लघ्वक्षरगुर्वक्षरादिनिरूपणम्, एकस्य छन्दसः अन्यस्मिन् छन्दसि विपरिणममन् इत्यादयः।

**सामतन्त्रम्** - भारतीयपरम्परानुसारेण आचार्य औदव्रजि एव सामतन्त्रस्य प्रणेता। यद्यपि सत्यव्रतसामश्रमी *सामतन्त्रन्तु गार्ग्येणेत्येव वयमुपदिष्टाः प्रामाणिकैः* इति प्रतिपादयन् सामतन्त्रं गार्ग्यप्रणीतं मन्यते, किन्तु प्रमाणाभावान्मतमिदं नैव क्षोदक्षमम्। सामवेदसर्वानुक्रमणीकारस्तु स्पष्टतया सामतन्त्रम् औदव्रजिकृतमाह। तत्रोच्यते – ***सामतन्त्रं प्रवक्ष्यामि सुखार्थं सामवेदिनाम्। औदव्रजिकृतं सूक्ष्मं सामगानां सुखावहम्॥***[6] इति। सामतन्त्रे योनिमन्त्रान् सामगाने परिवर्तयितुं विविधा रीतयो विवेचिताः सन्ति। सामवेदसर्वानुक्रमणीकृद्

[6] साम.- पृ.-4

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

ग्रन्थेऽस्मिन् तिथिसंख्यकान् (पञ्चदश) प्रपाठकान् स्मरति, किन्तु मुद्रिते ग्रन्थे त्रयोदश एव प्रपाठकाः सन्ति । विषयपार्थक्याद् अन्तिमप्रपाठकयुगलम् ***अक्षरतन्त्रम्*** इति व्यपदिश्यते । प्रपाठका दशकेषु विभक्ताः सन्ति दशकाश्च सूत्रेषु । त्रयोदशप्रपाठकात्मके सामतन्त्र एकादशाधिकत्रयोदशशतकानि (1311) विलसन्ति सूत्राणाम् । ग्रन्थोऽयं भाष्यसहितः मातृकाषट्कमाश्रित्य ए.एम.रामनाथदीक्षितमहाभागेन वाराणसीतः 1961 तमे ख्रीष्टाब्दे प्रकाशितोऽभवत् । ग्रन्थेऽस्मिन् विषयाः खलु सूत्रसंख्यासहयोगेन उल्लिखिताः सन्ति, न तु प्रप्राठकभेदेन । तद्यथा –

**संज्ञाप्रकरणम्** (सू.सं., 1-57), **उच्चनीचभावः** [नीचीभावः (सू.सं., 58-82), उच्चभावः (सू.सं., 83-166)], **वृद्धिभावः** (सू.सं., 167-191), **नुभावः** (सू.सं., 172-198, 273-275, 288-289), **स्वरान्तभावः** (सू.सं.,199-210), **विनतभावः** (सू.सं., 212-213), **मिन्भावः** (सू.सं., 214-230), **कर्षणभावः** (सू.सं., 231-247, 292-395), **मन्द्रस्वरः** (सू.सं., 248-253), **प्रणतभावः** (सू.सं., 268-272), **प्रत्युत्क्रमभावः** (सू.सं., 273-281), **परिस्वारभावः** (सू.सं., 282-287), **अतिक्रमभावः** (सू.सं., 396-406), **वृद्धावृद्धभावः** (सू.सं., 407-718), **दीर्घीभावः** (सू.सं., 719-776), **सन्ध्यगीतम्** (सू.सं., 777-787), **पदगीतम्** (सू.सं., 788-814), **विकर्षभावः** (सू.सं., 815-848), **संकर्षभावः** (सू.सं., 849-904), **आइभाव आभावो** वा (सू.सं., 905-1037), **अतिहारभावः** (सू.सं., 1038-1043), **लोपः** (सू.सं., 1044-1091), **वन्तविधिः** (सू.सं., 1092-1107), **अंभावः** (सू.सं., 1108-1115), **ओभावः** (सू.सं., 1116-1136), **ऐभावः** (सू.सं., 1137-1152), **एभावः** (सू.सं., 1153-1176), **यभावः** (सू.सं., 1177-1194), **रहस्ये सर्वे भावाः** (सू.सं., 1196-1311) इति ॥

**पुष्पसूत्रम्** – सामवेदस्य अपरं प्रातिशाख्यं पुष्पसूत्रमिति । तस्य फुल्लसूत्रमिति नामान्तरमपि प्रयुज्यते । पुष्पसूत्रमिति संज्ञामाश्रित्य केचिद्विद्वांसो ग्रन्थमेनं पुष्पाचार्यप्रणीतमिति मन्यन्ते । मैक्समूलरमहोदयस्तु आचार्यगोभिलमेव पुष्पसूत्रस्य प्रणेतारमाह ।[7] आर्षेयब्राह्मणस्य भूमिकायां बर्णेलमहाभागः प्रत्यपादयत् यत् दक्षिणभारतीयहस्तलिखितेषु ग्रन्थेषु स्पष्टतया तस्य प्रणेता वररुचिरिति निर्दिष्ट इति ।[8] सूर्यकान्तमहोदयः स्वसम्पादितस्य ऋक्तन्त्रस्य भूमिकायां *पुष्पसूत्रम् ऋक्तन्त्रं सामतन्त्रं सर्वमेतद् औदव्रजिप्रणीतम्* इति प्रतिपादयन्

[7] History of Sanskrit Literature – p. 187 (We miss in this list the Pushpasutra, ascribed to Gobhila and containing rules on the adaptation of the text of the hymns to their musical performance.)

[8] Arsheyabrahmana, Introduction – p. xxiii (The text has been ascribed to Gobhila (Max. Anc. San. Lit. 2nd ed. P.210) but the South Indian Mss. distinctly ascribe it to aVararuci.)

दृश्यते ।[9] सामवेदीये वंशब्राह्मणेऽपि पुष्पसूत्रस्य प्रणेता औदव्रजिः इति मतमस्ति ।[10] सामवेदसर्वानुक्रमणीकारो हरदत्तस्तु सामसाहित्यम् उपवर्णयन् *पुष्पसूत्रस्य प्रणेतारं वररुचिं* नमस्करोति ।[11]

पुष्पसूत्रे माध्यन्दिनपवमानप्रभृतीनां सामवेदीयस्तोत्राणां विवेचनमुपलभ्यते । सकलोऽपि ग्रन्थो दशप्रपाठकात्मकः । प्रतिप्रपाठकानां विषय एव –

**प्रथमप्रपाठके** – दशरात्र-सम्वत्सर-एकाह-पर्वाणि आलोचितानि । **द्वितीयप्रपाठके** – अहीन-सत्र-प्रायश्चित्त-रहस्यगान-सम्वत्सर-एकाह-अहीन-क्षुद्रादीनि पर्वाणि सन्ति । **तृतीयप्रपाठके** – आइभाव-प्रकृतिभावौ आलोचितौ । **चतुर्थप्रपाठके** – प्रकृतिभाव आलोचितः । **पञ्चमप्रपाठके** – वृद्धावृद्धे, गतागतम्, उच्चनीचे उद्गीथाधिकारः, उच्चनीचे संग्रह आलोचिताः । **षष्ठप्रपाठके** – पदवत्सन्धिवद्गाने, अत्वम्, आर्भाव-अनार्भावौ, प्रश्लेषविश्लेषौ, सङ्कर्षविकर्षौ । **सप्तमप्रपाठके** - सङ्कर्षविकर्षौ, लोपालोपौ, औभाव-अनौभावौ, अतिहारः, आभाव इत्यादयः । **अष्टमप्रपाठके** – आभावः, विकारः । **नवमप्रपाठके** – विकल्पः, भावः । **दशमप्रपाठके** - भावः, भावशेषः, प्रस्ताव आलोचितः ।

सर्वे प्रपाठकाः पुनः कण्डिकासु विभक्ताः । ग्रन्थमेनं स्पष्टयितुम् अजातशत्रुविरचितं भाष्यं महत्त्वपूर्णं वर्तते । भाष्यमिदं पञ्चमप्रपाठकमारभ्य ग्रन्थसमाप्तिपर्यन्तं दृश्यते । अजातशत्रुकृतभाष्यसहितं पुष्पसूत्रं मातृकात्रयमाधृत्य काशीस्थश्रीलक्ष्मणशास्त्रिद्राविडमहाभागेन 1922 तमे खीष्टाब्दे प्रकाशितम् । श्रीरामकृष्णदीक्षितोऽपि अस्य ग्रन्थस्य फुल्लदीपिकां टीकां प्रणिनाय । तत्रोच्यते –

***इदं फुल्लस्य सूत्रस्य बृहद् भाष्यं हि यत्कृतम् । नानाभाष्याख्या रामकृष्णदीक्षितसूरिभिः ॥***[12] इति । आङ्गलभाषीयानुवादयुतोऽयं ग्रन्थः तारलेकमहाभागेन इन्दिरागान्धीराष्ट्रियकलाकेन्द्र-दिल्लीतः 2001 तमे खीष्टाब्दे प्रकाशितः इति ॥

**ऋक्तन्त्रम्** – सूत्ररूपेणोपनिबद्धः *ऋक्तन्त्रम्* सामवेदस्य कौथुमशाखायाः संहितया सम्बन्धितं प्रातिशाख्यं वर्तते । ग्रन्थस्यास्य प्रवक्तृविषये नास्ति विदुषां मतसाम्यम् । ऋक्तन्त्रं मूलत औदव्रजिना प्रणीतमासीत्, पश्चाच्च तदनुयायी शाकटायनो ग्रन्थमेनं परिचस्कार इति महता प्रयासेन सप्रमाणं प्रतिपादितं सूर्यकान्तमहाभागेन

---

[9] ऋक्तन्त्रस्य भूमिका, पृ. – 37-39

[10] वंश. – 3.4 (भद्रशर्मा कौशिकः पुष्पयशस औदव्रजेः)

[11] साम. – पृ.- 4 (सूत्रकारं वररुचिं वन्दे)

[12] साम. – पृ. - 7

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

ऋक्तन्त्रस्य भूमिकायाम् ।[13] नागेशाचार्योऽपि परिष्कृतमुपलब्धम् ऋक्तन्त्रं शाकटायनप्रणीतमेव मन्यते ।[14] ऋक्तन्त्रस्य एकस्मिन् हस्तलिखितपुस्तकेऽपि ऋक्तन्त्रस्य शाकटायनकर्तृत्वमुल्लिखितमुपलभ्यते । सामवेदसर्वानुक्रमणी अपि तदेव समर्थयति ।[15]

ऋक्तन्त्रे मुख्यतया व्याकरणविषयकं विवेचनं वर्तते । ऋक्तन्त्रः पञ्चप्रपाठकेषु विभक्तः । ते पञ्चप्रपाठकाः दशकसंज्ञेषु खण्डेषु विभक्ताः दशकाश्च सूत्रेषु । ग्रन्थेऽस्मिन् सप्ताशीत्युत्तरद्विशतसंख्यकानि (287) सूत्राणि सन्ति । अस्य **प्रथमप्रपाठके** शब्दोत्पत्तिप्रक्रियाया अक्षरसमाम्नायस्य वर्णोच्चारणस्य च विधानमस्ति । **द्वितीयप्रपाठके** पारिभाषिकशब्दानां विवेचनम् अभिनिधानम् अक्षरविभाजनमुदात्तादीनां स्वराणां च विधानं विद्यते । **तृतीये चतुर्थे पञ्चमे** च प्रपाठके संहिताविषयकं विधानं विहितम् इति ।।

**अक्षरतन्त्रम्** – सामतन्त्रस्य चतुर्दशपञ्चदशप्रपाठकरूपं प्रपाठकयुगलम् अक्षरतन्त्रम् इत्यधिभीयते । अत एव सामतन्त्रस्य प्रणेता आचार्य औदव्रजिरेव ग्रन्थस्यास्य प्रणेता इति नास्ति सन्देहावसरः ।

अक्षरतन्त्रे प्रपाठकद्वयमस्ति । प्रपाठकद्वयात्मके अक्षरतन्त्रे सामगानपोयोगिनः स्तोभा विवेचिताः सन्ति । का नाम स्तोभा इति चेदुच्यते सामगानावसरे सामगानाय यावन्तो वर्णा अपेक्षन्ते तावन्तः प्रायः योनिमन्त्रेषु नैव भवन्ति । अत एव गीतिपूर्त्यर्थम् ऋग्व्यातिरिक्तस्य वर्णस्य वर्णसमुदायस्य वाऽतिरिक्तः पाठः क्रियते । तद्रूपो वर्णो वा वर्णसमुदायो वा स्तोभः इत्यभिधीयते । अक्षरमिति स्तोभस्यैव संज्ञान्तरम् । अक्षरतन्त्रस्य प्रथमप्रपाठकस्य प्रथमदशकस्य ***अनृगाद्यक्षरम्*** इति प्रथमसूत्रस्य भाष्ये (1.1.1) निगदितम् – *न ऋगादि अनृगादि, ऋग्लक्षणादिभिन्नं समागतं वर्णादि अक्षरसंज्ञं भवति । उदाहरणानि – आ, उप, मोयि, उम् इत्येवमादीनि । स्तोभ इति चास्यैव संज्ञान्तरम्* इति ।

ग्रन्थ एष द्विप्रपाठकात्मक इति पूर्वमुक्तम् । प्रतिप्रपाठके त्रयोदश दशका विद्यन्ते । प्रतिदशके दशसूत्राणि सन्ति । तदेवमिह षष्ट्यधिकद्विशतसूत्राणि (260) विराजन्ते । तत्र प्रथमे दशके अक्षरसंज्ञादीन्युपदिष्टानि । द्वितीयादिषु षट्सु अक्षराणां प्रयोगविधींश्चोक्त्वा तत उत्तरमाग्रन्थसमाप्तेः तदक्षरगतस्वरपर्वविधय एव सूत्रिताः इति ।।

**तैत्तिरीयप्रातिशाख्यम्** – कृष्णयजुर्वेदस्य तैत्तिरीयशाखायाः संहितया सह सम्बन्धितं प्रातिशाख्यमिदम् । तस्य ग्रन्थकर्तुर्नाम अज्ञातो विद्यते । इदमेव ऋग्वेदप्रातिशाख्यव्यतिरिक्तेषु प्रातिशाख्येषु प्राचीनं विद्यते । यद्यपि आकारेण ऋद्वेदप्रातिशाख्यापेक्षया लघुकायमस्ति तैत्तिरीयनामाख्यं प्रातिशाख्यमिदं तथापि

[13] ऋक्तन्त्रस्य भूमिका – पृ. – 33-43

[14] ऋक्तन्त्रव्याकरणे शाकटायनोऽपि

[15] साम. – पृ. – 3 (ऋचान्तन्त्रव्याकरणे पञ्च संख्या प्रपाठकम् । शाकटायनदेवेन द्वात्रिंशत् खण्डकाः स्मृताः ।।)

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

विषयप्रतिपादनदृष्ट्या तत्तु महत्त्वपूर्णमेवास्तीति नास्ति सन्देहः । वर्णोच्चारणविषयकविधानानां यादृशं प्रतिपादनमत्र वर्तते तादृशं नान्येषु प्रातिशाख्येषु । अतएव भाषावैज्ञानिकानां कृते ध्वनिविज्ञानक्षेत्रे अपि अस्य प्रातिशाख्यस्य महत्त्वपूर्णं स्थानं विद्यते ।

ग्रन्थेऽस्मिन् सप्तचत्वारिंशदधिकपञ्चशताधिकानि (547) सूत्राणि सन्ति । प्रातिशाख्ये प्रश्नद्वयं विद्यते । प्रतिप्रश्ने द्वादशाध्यायाः विद्यन्ते । एवं समस्तप्रातिशाख्यमिदं चतुर्विंशत्यध्यायेषु विभक्तम् । तत्र **प्रथमाध्याये** वर्णसमाम्नायस्योपसर्गाणां संज्ञाशब्दानामुदात्तादिस्वरस्वरूपस्य च विवेचनमस्ति । **द्वितीयाध्याये** वर्णोत्पत्तिविषयकम् अकारादिवर्णानामुच्चारणस्थानकरणविषयकं अनुनासिकस्वरूपस्य च वर्णनं विद्यते । **तृतीयाध्याये** संहितास्थदीर्घस्वरवर्णानां पदपाठे ह्रस्वत्वविधानम् । **चतुर्थाध्याये** प्रग्रहविधानम् । **पञ्चमाध्याये** शास्त्रस्यास्य संहिताविषयत्वम्, प्रकृतिस्वरूपनिर्वचनम्, शकार-दकारागमविधिः, अरादेशविधिः, मकार-वकार-सकार-विसर्जनीययाकारलोपविधिः, शकारस्य छकारादेश इत्यादयो विहिताः । **षष्ठाध्याये** सारविसर्जनीययोष्णादेशविधिः, तदपवादः, पदान्तप्राकृतनकारस्य सादेशविधिः । **सप्तमाध्याये** नकारस्य णत्वविधिः, तथयोः टठादेशविधिः । **अष्टमाध्याये** उत्तमपरप्रथमस्योत्तमादेशः, विसर्जनीयस्य रेफादेशविधिः, विसर्जनीयलोपादिविधिः, विसर्जनीयस्य सत्वषत्वविधिः । **नवमाध्याये** विसर्जनीयस्य लोपादेशविधिः, अयवाद्यादेशविधिः, ङनकारयोर्द्वित्वम् इत्यादयः । **दशमाध्याये** स्वरसन्धिः, क्वचिदाकारस्य प्रकृतिभावः, अकाराकारयोर्लोपः, इकारस्य प्रकृतिभावः, पदान्तवकारयोर्लोप इत्यादयः । **एकादशाध्याये** अकारलोपविधिः, अकारस्य लोपाभावः । **द्वादशाध्याये** अकारस्य लोपालोपौ, तन्निमित्तोदात्तादिस्वरभेदः । **त्रयोदशाध्याये** मकारस्य लोपालोपौ, नस्य णत्वविधिः प्राकृतणकारश्च, ळस्य डादेशः । **चतुर्दशाध्याये** दित्वविधिः, आगमविधिः, ऊष्मवर्णस्य सवर्गीयद्वितीयादेशः, स्वरितादिविधि इत्यादयः । **पञ्चदशाध्याये** अनुस्वारविधिः, स्त्रादिष्वनुस्वारविधिः, समानाक्षरेष्वनुनासिकविधि इत्यादयः । **षोडशाध्याये** पदमध्यवर्त्यूष्मभ्यः पूर्वमनुसावारागमविधिः । **सप्तदशाध्याये** अनुस्वारे अनुनासिकगुणविवेचनं तस्योच्चारणप्रक्रियाविषयकं विधानं च विद्यते । **अष्टादशाध्याये** प्रणवस्य उच्चारणकालस्वरविषयको विधानं विहितम् । **एकोनविंशाध्याये** विक्रमस्वरस्य कम्पस्य च विधानम् । **विंशाध्याये** क्षैप्रादिस्वरितानां स्वरूपम् । **एकविंशाध्याये** अक्षरविभाजनविषयकं विधानम्, यम-नासिक्यादिध्वनिनां स्वरूपम् । **द्वाविंशाध्याये** शब्दोत्पत्तिः, पारिभाषिकसूत्रस्य उदात्तादिस्वराणामुच्चारणं विहितम् । **त्रयोविंशे** वर्णोत्पत्तेः सामवेदीयस्वराणाम् आह्वारकस्वरस्य च निरूपणं विद्यते । **चतुर्विंशे** संहितायाः प्रकारः तल्लक्षणं वेदस्याध्ययने वेदस्याधेत्र्याध्यापकयोः योग्यताविषयकं विवेचनं विहितम् इति ॥

IJAMSR

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**वाजसनेयि-प्रातिशाख्यम्** – ग्रन्थस्यास्य प्रणेता आचार्यः कात्यायन एव वर्तते । शुक्लयजुर्वेदस्य वाजसनेयिशाखायाः संहिता सम्बन्धितप्रातिशाख्यमिदम् । शुक्लयजुर्वेदप्रातिशाख्य-नाम्ना अपि प्रसिद्धमिदं वाजसनेयिप्रातिशाख्यम् । प्रातिशाख्यमिदम् अष्टसु अध्यायेषु विभक्तोऽस्ति ।

ऋग्यजुस्सामाथर्वेषु चतुर्षु वेदेषु यजुर्वेदः खलु कृष्ण-शुक्लभेदेन द्विधा विभज्यते । कृष्णयजुर्वेदस्य प्रातिशाख्यमेव तैत्तिरीयप्रातिशाख्यम् । शुक्लयजुर्वेदस्य प्रातिशाख्यमेव अस्माकमालोच्य शुक्लयजुर्वेदप्रातिशाख्यं वाजसनेयिप्रातिशाख्यं वा । ग्रन्थस्यास्य रचयिता एव शौनकाचार्यस्य शिष्य आचार्यः कात्यायनः । ग्रन्थस्यास्य भाष्यकारौ उवटाचार्य अनन्तभट्टाचार्यः चेति । भाष्यस्य नाम एव यथाक्रमेण *मातृमोदः पदार्थप्रकाशः* चेति ।

आकारदृष्ट्या वाजसनेयिप्रातिशाख्यम् ऋग्वेदप्रातिशाख्यापेक्षया क्षुद्रतरम् । परन्तु प्रातिशाख्यान्तरापेक्षया बृहत्तरम् । प्रातिशाख्येऽस्मिन् अष्टाध्यायाः सन्ति । परन्तु सूत्रसंख्याविषये ग्रन्थस्यास्य मुद्रितेषु संस्करणेषु पार्थक्यमस्ति । तद्यथा –

जीवानन्दस्य संस्करणे सूत्रसंख्या 723, वेङ्कटराम-शर्मणः संस्करणे 726, इन्दु-रास्तोगी-महोदयायाः संस्करणे सूत्रसंख्या 740, वीरेन्द्रकुमार-वर्मणः संस्करणे सूत्रसंख्या 734 । अष्टमाध्यायस्य सूत्रविन्यासे अव्यवस्थाहेतुरत्र सूत्रसंख्या अपि विभिन्ना जाता ।

ग्रन्थस्यास्य बहूनि संस्करणानि सन्ति । तद्यथा –

**वि. वेङ्कटरामशर्म-महोदयेन** सम्पादितं कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं मद्रपुरीविश्वविद्यालयतः1934 खीष्टाब्दे प्रकाशितं जातम् । **एस.एन.घोषाल-महोदयेन** कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं 1964 खीष्टाब्दे Indian Studies : Past & Present इत्यतः प्रकाशितं जातम् । **इन्दु-रास्तोगी-महोदयया** कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं 1967 खीष्टाब्दे चौखम्भा-संस्कृत-संस्थान इत्यतः आङ्गलानुवादेन सह प्रकाशितं जातम् । **वीरेन्द्रकुमारवर्म-महोदयेन** सम्पादितं कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं काशी-हिन्दु-विश्वविद्यालयतः 1975 खीष्टाब्दे प्रकाशितं जातम् ।

ग्रन्थेऽस्मिन् अष्ट अध्यायाः सन्ति । प्रत्यध्यायस्य विषयवस्तु –

**प्रथमाध्यायस्य विषयः** – वर्णोत्पत्तिः, अध्ययनविधिः, संज्ञा-परिभाषा, वर्णानामुच्चारणस्थानं तथा करणम्, पूर्वाङ्ग-पराङ्गचिन्तनम् । **द्वितीयाध्यायस्य विषयः** – स्वरविषये नियमाः । **तृतीयाध्यायस्य विषयः** – सन्धिविषयकाः नियमाः । **चतुर्थाध्यायस्य विषयः** – सन्धिविषयकाः नियमाः, पदपाठस्य नियमाः,

क्रमपाठस्य नियमाः । **पञ्चमाध्यायस्य विषयः** – अवग्रहविषयकाः नियमाः । **षष्ठाध्यायस्य विषयः** – आख्यातस्य तथा क्रियापदस्य स्वरविषयकाः नियमाः, उपसर्गस्य स्वरविषयकाः नियमाः, कतिपयानां शब्दानां स्वरूपाणि । **सप्तमाध्यायस्य विषयः** – परिग्रहविषयकाः नियमाः । **अष्टमाध्यायस्य विषयः** – वर्णसमाम्नायः, अध्ययनविधिः, वर्णानां देवता, पदचतुष्टयम्, पदानां गोत्राणि देवताः च इति ॥

**अथर्ववेदप्रातिशाख्यम्** - सूत्ररूपेणोपनिबद्धं प्रातिशाख्यमिदम् अथर्ववेदस्य संहितया सम्बन्धितः विद्यते । ग्रन्थस्यास्य पाठद्वयं समुपलभ्यते अस्माभिः - विश्वबन्धुशास्त्रिणा सम्पादितं, सूर्यकान्तेन सम्पादितं चेति । विषयविवेचनदृष्ट्या अन्यप्रातिशाख्यापेक्षया ग्रन्थस्यास्य विषय अत्यन्तसीमितो वर्तते । ग्रन्थेऽस्मिन् उदात्तादिस्वरविषयकं, सन्धि-पदपाठविषयकं कतिपय विधानमुपलभ्यते । सूर्यकान्तमहाभागानुसारं प्रातिशाख्यमिदम् अथर्ववेदस्य पैप्पलादशाखायाः अन्तर्गतम् । परन्तु ड.जमुनापाठकमतानुसारेण एतत् चतुरध्यायिकायाः पूरकरूपेण परिशिष्टं विद्यते, अथर्वचरणस्य प्रातिशाख्यं तु *चतुरध्यायिका* एव विद्यते इति ।

प्रातिशाख्यस्यास्य **प्रथमाध्याये** ध्वनयः तेषां वर्गीकरणं च, विसर्जनीयः, अभिनिधानः, ध्वनीनाम् आन्तर-परिवर्तनानि, उपधा, ध्वनीनां सन्निधिः आलोचितः । **द्वितीयाध्याये** अन्तिमस्पर्शानां संयोजनम्, विसर्जनीयस्य संयोगः, अनियमितसंयोजानां विशेषप्रकरणाः, व्यञ्जनानां परिवर्तनम् अपवादश्च आलोचितः । **तृतीयाध्याये** संहितायां शब्दानां दीर्घीकरणम्, व्यञ्जनानां द्वित्वम्, स्वरितस्वरस्य उच्चारणं तस्य प्रकारश्च, दन्त्यनासिकानां मूर्धणीकरणं विहितम् । **चतुर्थाध्याये** पदपाठे विभक्तीनां संयोगः, अवग्रहः, पदपाठे क्रमपाठे च प्रगृह्यप्रयोगः अपवादाश्च, क्रमपाठस्य प्रयोजनीयता विहिता इति ॥

**चतुरध्यायिका** – प्रातिशाख्यमिदम् अथर्ववेदस्य शौनकशाखायाः संहितया सम्बन्धितो वर्तते । ग्रन्थस्यास्यकर्ता आचार्यः कौत्सो विद्यते । ग्रन्थस्यास्य रचनाकालविषये निश्चयेन वक्तुं न शक्यते । परञ्च *प्रथमान्तानि तृतीयान्तानि शोनकस्य प्रतिज्ञानं न वृत्तिः* इत्यनेन विधानेन[16] ज्ञायते यद् ग्रन्थोऽयं शौनककृतादृग्वेदप्रातिशाख्यात् परवर्ती विद्यते । शौनकाचार्योऽपि निरुक्तकाराद् यास्काचार्यात्परवर्ती विद्यते यतो हि शौनकेन ऋग्वेदप्रातिशाख्ये *न दाशतय्येकपदा काचिदस्तीति वै यास्कः* इत्यत्र[17] यास्कस्य मतमुद्धृतम् । अत एवचतुरध्यायिका ऋग्वेदप्रातिशाख्यापेक्षया यास्काद् अधिकपरवर्तीरचना वर्तते ।

विविधेषु स्थलेषु ग्रन्थस्यास्य पृथक्पृथङ्नामोपलभ्यते – *अथर्ववेदप्रातिशाख्यम्, शौनकीया चतुरध्यायिका, अथर्ववेदीयकौत्सव्याकरणम्, अथर्ववेदीया चतुरध्यायिका* च । ग्रन्थोऽयं चतुर्षु अध्यायेषु विभक्त इति कृत्वा

---

[16] चतु. – 1.1.8

[17] ऋक्प्रा. – 17.42

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

चतुरध्यायिका इति नाम्ना व्यपदिशयते । शौनकशाखासम्बन्धात् ग्रन्थोऽयं *शौनकीया चतुरध्यायिका* इति नाम्ना अपि परिचीयते । *अथर्ववेदीया चतुरध्यायिका* इति नाम्नाऽनेन ज्ञायते यदथर्वचरणस्य प्रातिशाख्यमिदं चतुरध्यायात्मकं विद्यते । चतुरध्यायिकानाम्ना एव पूर्वभाष्यकारैः स्वभाष्यस्य नामधेयं चतुरध्यायिभाष्यं कृतम् ।

चतुरध्यायिकायां चत्वारोऽध्यायाः सन्ति । प्रत्यध्याये तु चत्वारः पादाः सन्ति । तत्र -

**प्रथमाध्यायस्य प्रथमपादे** – वर्ण्यविषयनिर्देशनम्, पदसंज्ञाविधानम्, पदान्त्यवर्णनिर्देशः, सोष्मसंज्ञाविधानम्, उदात्त-अनुदात्त-स्वरितसंज्ञाविधानम्, अभ्यन्तरप्रयत्नविधानम्, सन्ध्यक्षराणां विधानम् इत्यादयः सन्ति । **प्रथमाध्यायस्य द्वितीयपादे** – अभिनिष्ठानसंज्ञाविधानम्, अभिनिधानसंज्ञाविधानम्, आस्थापितसंज्ञाविधानम्, संयुक्तव्यञ्जनाना-मुच्चारणविधानम्, लघु-गुरुसंज्ञाविधानम्, ह्रस्व-दीर्घ-प्लुतसंज्ञाविधानं विहितम् । **प्रथमाध्यायस्य तृतीयपादे** – उकारभावः, रेफस्य लकारभावः, लकारस्य रेफभावः, प्रगृह्यसंज्ञाविधानम्, ह्रस्व-दीर्घानुनासिकविधानं विहितम् । **प्रथमाध्यायस्य चतुर्थपादे** – उपधासंज्ञाविधानम्, अक्षरसंज्ञाविधानम्, परिभाषाविधानम्, संयोगसंज्ञाविधानम्, यमविधानम्, स्वरभक्तिविधानम् इत्यादयः सन्ति ।

**द्वितीयाध्यायस्य प्रथमपादे** – संहिताधिकारकथनम्, प्रथमवर्णस्य तृतीयस्पर्शभावः प्रथमवर्णस्य द्वितीयस्पर्शभावः, तकारागमविधानम्, रेफस्य लोपविधानम्, प्रथमस्य अघोषभावः, रेफस्य लोपविधानम्, वकारस्य लेपनिषेधः, नकारस्य रेफभाव इत्यादयः सन्ति । **द्वितीयाध्यायस्य द्वितीयपादे** – विसर्जनीयस्य परसस्थानभावः, विसर्जनीयस्य .कारभावः, विसर्जनीयस्य रेफभावः, विसर्जनीयस्य उकाराभावः, विसर्जनीयस्य लोपविधानम् विहितम् । **द्वितीयाध्यायस्य तृतीयपादे** – विसर्जनीयस्य उकारभाव-तकारभाव-सकारभावो विहितः । **द्वितीयाध्यायस्य चतुर्थपादे** – विसर्जनीयस्य षकारभावः तन्निषेधश्च विहितः ।

**तृतीयाध्यायस्य प्रथमपादे** – संहितायां ह्रस्वस्वरस्य दीर्घभावो विहितः । **तृतीयाध्यायस्य द्वितीयपादे** – द्वित्वविधानम्, प्रकृतिभावविधानम्, अपृक्ताकारस्य सन्धिविधानम्, एकाराभावः, ओकाराभावः, अर्भावः, आर्भावः, ऐकारभावः, औकारभावः इत्यादयो विहितः । **तृतीयाध्यायस्य तृतीयपादे** – स्वरितसंख्याकथनम्, स्वरितभेदकथनम्, स्वरितसन्धिकथनम्, अभिनिहित-प्रश्लिष्ट-जात्य-क्षैप्र-तैरोव्यञ्जन-पादवृत्तस्वरितविधानम्, कम्पविधानम्, अवग्रह-स्वरितविधानम्, व्यञ्जनस्वरनिरूपणम्, विरामकालनिर्धारणम् इत्यादयो सन्ति । **तृतीयाध्यायस्य चतुर्थपादे** – नकारस्य णकारभावः तन्निषेधश्च विहितः ।

**चतुर्थाध्यायस्य प्रथमपादे** – अध्यायविशेषनिर्देशम्, पदानां भेदाः, आख्यात-नाम-निपात-उपसर्ग-नामसमास-गतिस्वर-समास-विग्रह-विधानम् इत्यादयः सन्ति । **चतुर्थाध्यायस्य द्वितीयपादे** –

अवग्रहनिर्देशकथनं विहितम् । **चतुर्थाध्यायस्य तृतीयपादे** – समापत्तिसंज्ञाविधानम्, समासत्तिस्थलविधानम्, समापत्तिनिषेधविधानं विहितम् । **चतुर्थाध्यायस्य चतुर्थपादे** – वेदाध्यनविधानम्, पदपाठप्रयोजनम्, क्रमपाठप्रयोजनम्, द्विपदक्रमविधानम्, त्रिपदक्रमविधानम्, परिहारसंज्ञाकथनम्, उकारस्य परिहारविधानम्, उकारस्य परिहारप्रयोजनम् इत्यादयो सन्ति ।

एतदेव संक्षेपेण प्रातिशाख्यानां विवरणम् इति ।।

**तेषां प्रातिशाख्यानां परवर्तिसाहित्ये प्रभावस्तथा तेषां प्रयोजनः -**

वेदानां सुरक्षार्थं प्राचीनाचार्यैः बहूनि कार्याणि कृतानि । तन्निमित्तं शिक्षाकल्पव्याकरणनिरुक्तछन्दज्योतिषां षण्णां वेदाङ्गानां रचना कृता । तदुद्देश्यपूरणाय प्रातिशाख्यग्रन्थानामपि प्रणयनमभवत् । आचार्यकात्यायनेन स्वग्रन्थे वाजसनेयिप्रातिशाख्ये उद्घोषितं यत् वर्णदोषविवेकार्थं प्रातिशाख्योऽयं विरचितः । तात्पर्योऽयं यत् यावत् पदविशेषस्य साधुरूपस्य तत्प्रयुक्तवर्णानां शुद्धोच्चारणस्य च ज्ञानं न भवति तावत् तत्पदविशेषस्य शुद्धतायाः ज्ञानमपि न भवितुं शक्नोति । पदानां शुद्धरूपस्य शुद्धोच्चारणस्य ज्ञानानन्तरं तद्दोषपरिहारकर्तुं शक्नोति । अत एव वर्णच्चारणदोषाणां परिहारार्थं प्रातिशाख्यग्रन्थानामध्ययनमावश्यकम् ।

भाष्यकारोवटाचार्येण शुक्लयजुर्वेदप्रातिशाख्यस्य प्रथमाध्यायस्य प्रथमसूत्रस्य भाष्ये प्रातिशाख्यस्य प्रयोजनं प्रतिपादितं यन्मन्त्राणां यथोचितपाठज्ञस्य जनस्यैव जपादौ अधिकारो विद्यते । अत एव मन्त्राणां शुद्धोच्चारणस्य ज्ञानार्थं प्रातिशाख्यस्याध्ययनम् आवश्यकम् । उच्यते –

***जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः । प्रातिशाख्यमतो ज्ञेयः सम्यक्पाठस्य सिद्धये ।।*** इति ।

तैत्तिरीये प्रातिशाख्ये विहितं वेदाध्येतॄणां कृते गुरुता-लघुता-साम्य-ह्रस्वदीर्घप्लुत-विक्रमसंज्ञकस्वरद्वित्त्व-उदात्त-अनुदात्त-स्वरित-श्वास-नाद-अङ्गाङ्गिभावानां बोध अनिवार्यः । वेदस्य शिक्षकाचार्याणां कृते पदपाठ-क्रमपाठ-संहितापाठ-उदात्तादिस्वर-ह्रस्वादि-मात्राणां ज्ञानमावश्यकम् –

***गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च । लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ।।***
***स्वरितोदात्तनीचत्वं श्वासो नादोऽङ्गमेव च । एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता ।।*** [18] इति ।

अपि च, ***पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः । स्वरमात्रविभागज्ञो गच्छेदाचार्यसम्पदम् ।।*** [19] इति ।

[18] तै.प्रा. – 24.5
[19] तै.प्रा. – 24.6

I J A M S R

**International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

गुरुत्वलघुत्वादिज्ञानाय प्रातिशाख्याध्ययनमनिवार्यम् । ऋग्वेदप्रातिशाख्यस्य भाष्यारम्भे भाष्यकारेण उवटाचार्येण प्रातिशाख्यस्य प्रयोजनं प्रदत्तं –

***शिक्षाछन्दोव्याकरणैः सामान्येनोक्तलक्षणम् । तदेवमिह शाखायामिति शास्त्रप्रयोजनम् ॥*** इति ।

एवं प्रतीयते यत् शिक्षाछन्दव्याकरणेषु सामान्यतः वेदानां सम्पूर्णशाखानां संहिताविषयकं विधानं विद्यते परञ्च प्रातिशाख्येषु शिक्षादिविहितान् नियमान् शाखाविशेषस्य संहिताविषये सीमितं कृत्वा विधानं कृतम् । एवं प्रतीयते यत् प्रतिशाख्यग्रन्थानां प्रणयनं शाखाविशेषायाः संहितायाः शुद्धमन्त्रोच्चारणमधिकृत्य कृतम् इति ।

यद्यपि वैदिकपरवर्तिसाहित्ये तथा लौकिकसंस्कृतसाहित्ये प्रातिशाख्यस्य कोऽपि प्रभावो न परिदृश्यते, तथापि वैदिकव्याकरणे तस्य प्रतिपादितानां नियमानां प्रभाव अवश्यमेव दरीदृश्यते । यतो हि वैदिकमन्त्राः खलु स्वरसमन्विताः सन्ति, तेषां स्वराणां नियमा अपि प्रातिशाख्ये समुपलभ्यन्ते नाम । यथा - ऋक्प्रातिशाख्यानुसारेण **स्वरितस्य सप्तप्रकाराः** सन्ति । यथा – **उदात्तपूर्वस्वरितम्** (ऋक्प्रा. – 3.7), **जात्यस्वरितम्** (ऋक्प्रा. – 3.8), **अभिनिहितस्वरितम्** (ऋक्प्रा. – 3.11), **क्षैप्रस्वरितम्** (ऋक्प्रा. – 3.13), **प्रश्लिष्टस्वरितम्** (ऋक्प्रा. – 3.13), **तैरोव्यञ्जनस्वरितम्** (ऋक्प्रा. – 3.17), **वैवृत्तस्वरितम्** (ऋक्प्रा. – 3.17) इति । एतेषु **अभिनिहितस्वरितस्य (ऋक्प्रा. – 3.13)** नियम उदाहरणञ्च - अभिनिहितसन्धौ मूलत अकारस्य अभिनिधानो दृश्यते । यथा – सः अयम् > सोऽयम्, पृच्छन्तः अवरासः > पृच्छन्तोऽवरासः इत्यादयः । *ते॑ऽवर्धन्त स्वत॑वसः* (संहितापाठः); *ते । अ व र्ध न्त । स्वऽत॑वसः* (पदपाठः) (ऋ. – 1.85.7) इति । अत्र ‘ते’ उदात्तः, अवर्धन्त-इति शब्दस्य अ-कार अनुदात्तः । उदात्तानुदात्तयोः सन्धौ ते-इत्यस्य स्वरितस्वरो भवति । एतदेव स्वरितम् अभिनिहितस्वरितमित्युच्यते । पुनः, **प्रश्लिष्टस्वरितस्य (ऋक्प्रा. – 3.13)** नियम उदाहरणञ्च - ***समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम्*** (ऋक्प्रा. - 2.15) इति सूत्रेण समानाक्षरे समानस्थाने समानोच्चारणस्थानविशिष्टे दीर्घमेकमुभेऽपि स्वरमापद्यते । अयमेव प्रश्लिष्टसन्धेर्बहुनियमेषु एको नियमः । यथा – *स्रुची॑व घृतम्* (संहितापाठः); *स्रुचिऽइ॑व । घृतम्* (पदपाठः) (ऋ. – 10.91.15) इति । अत्र उदात्तेन इ-कारेण सह अनुदात्तेन इ-कारेण सन्धौ स्वरितम् ई-कारम् उत्पद्यते । एतदेव स्वरितम् प्रश्लिष्टस्वरितमित्युच्यते, इत्यादयः ।

**स्वरोच्चारणे केचिद्दोषा** अपि ऋक्प्रातिशाख्ये (ऋक्प्रा. – 3.29-33) समुपवर्णिताः । वैदिकसाहित्ये उदात्तानुदात्तस्वरितभेदेन स्वरास्तु त्रिविधाः । उदात्तानुदात्तस्वरितस्वरान् विहाय प्रचयस्वरोऽपि विद्यते तत्र । प्रचयो नाम उदात्तश्रुति एकश्रुतिर्वा । स्वरितात् परेषाम् अनुदात्तानां प्रचयः स्वरो भवति । उदात्तानुदात्तस्वरितप्रचितान् स्वरान् असन्देहजनकान् ब्रूयादिति ऋग्वेदप्रातिशाख्यस्य भाष्यकारस्योवटाचार्यस्य मतम् । तत्र सूत्रितम् ***असन्दिग्धानस्वरान्ब्रूयात्*** (ऋक्प्रा. – 3.29) इति ।

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

स्वरोच्चारणविषये ऋक्प्रातिशाख्ये उल्लिखितेषु बहुविधेषु दोषेषु **प्रथमदोष** एव ***अविकृष्टान्*** (ऋक्प्रा. – 3.30) इति । तत्र विकर्षो नाम असुश्लिष्टता स्वराणां स्वरैः सह । स्वरसन्धीनुपश्लिष्टान् कुर्यादिति । अर्थात् स्वरसन्धौ संहितापाठे सर्वदा सन्धिं कृत्वा पठेत् । **द्वितीयदोष** एव ***अकम्पितान्*** (ऋक्प्रा. – 3.31) इति । तत्र कम्पनं नाम स्वराश्रितपाठदोषः । प्रायेण दाक्षिणात्यानाम् एवं दोषो भवति । दोष इति मत्वा तत्कम्पं वर्जयेत् । अर्थात् अकम्पितान् मन्त्रान् सर्वदा पाठयेत् । **तृतीयदोष** एव ***स्वरितं नातिनिर्हण्यात्*** (ऋक्प्रा. – 3.32) इति । आशयो यत् स्वरितमाक्षेपेण नाति प्रेरयेत् । आक्षेपेण तिर्यग्गमनेन इति । चतुर्थदोष एव ***पूर्वौ नातिविवर्तयेत्*** (ऋक्प्रा. – 3.33) इति । उदात्तानुदात्तौ स्वरौ आयामविश्रम्भाभ्यां नातिदूरं नयेदिति शौनकाचार्याभिप्रायः । उवटभाष्यानुसारेण पूर्वौ – उदात्तानुदात्तौ इति । एतदेव ऋक्प्रातिशाख्यानुसारेण स्वरोच्चारणे केचिद्दोषा इति ।

वाजसनेयिप्रातिशाख्यानुसारेण **स्वरितस्वरः सप्तविधः** । ते एव – **जात्यस्वरितः**, **अभिनिहितस्वरितः**, **क्षैप्रस्वरितः**, **प्रश्लिष्टस्वरितः**, **तैरोव्यञ्जनस्वरितः**, **तैरोविरामस्वरितः**, **पादवृत्तस्वरितः** चेति ।

**जात्यस्वरितः (शु.प्रा. – 1.111)** – एकस्मिन् पदे अनुदात्तपूर्वः यकारेण वकारेण सहितः जात्यस्वरः प्रत्येतव्यः । सूत्रं तु ***एकपदे नीचपूर्वः सयवो जात्यः*** इति । नीचपूर्वः अनुदात्तपूर्व इति । यथा – **नीचपूर्वः** – *कन्या॑ इव* (वाज. – 17.97) इति । **अपूर्वः** – *स्व॑र्देवेषु॑* (वाज. – 18.64) इति ।

**अभिनिहितस्वरितः (शु.प्रा. – 1.114)** – एकारौकाराभ्यामुदात्ताभ्याम् परे स्थित अनुदात्तोऽकारो यत्र लुप्यते तत्राभिनिहितस्वरो भवति । सूत्रं ***एदोद्भ्यामकारो लुगभिनिहितः*** इति । यथा – *ते अ प्सरसाम्* (संहितापाठः) > *ते॑ऽप्सरसा॑म्* (पदपाठः) (वाज. – 24.37) इति ।

**सन्धिविषयकाः** नियमा अपि प्रातिशाख्येषु विद्यन्ते । तेषु कतिपया एव -

**प्रश्लिष्टसन्धिः (ऋक्प्रा. – 2.15-20)** – स्वरसन्धिषु प्रथम एव प्रश्लिष्टसन्धिः । पाणिनीव्याकरणस्य ***अकः सवर्णे दीर्घः***,[20] ***आद्गुणः***,[21] ***वृद्धिरेचि***[22] इति त्रीणि सूत्राणि ऋक्प्रातिशाख्यस्य प्रश्लिष्टसन्धेरन्तर्गतानि इति । ***समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम्*** (ऋक्प्रा. - 2.15) इति सूत्रेण समानाक्षरे समानस्थाने समानोच्चारणस्थानविशिष्टे दीर्घमेकमुभेऽपि स्वरमापद्यते । यथा – *अश्वाजनि प्रचेतसः* > अश्व अजनि > अश्वाजनि (ऋ. – 6.75.13) । *क्षीरं सर्पिर्मधूदकम्* > मधु उदकम् मधूदकम् (ऋ. – 9.67.32) इत्यादयः । ***इकारोदय एकारमकारः सोदयः*** (2.16) इति सूत्रेण इकारपरोऽकार उभयं मिलित्वा एकारमापद्यते । यथा –

[20] पा. – 6.1.101
[21] पा. – 6.1.87
[22] पा. – 6.1.88

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

*एन्द्र सानसिं रयिम्* > आ इन्द्र > एन्द्र (ऋ.–1.8.1) इत्यादयः । ***तथा । उकारोदय उकारम्*** (ऋक्प्रा. – 2.17) इति सूत्रेण उकारपरोऽकारम् ओकारमापद्यते । यथा – *एतायामोप गव्यन्त इन्द्रम्* > आ इत अयाम उप > एतायामोप (ऋ. – 1.33.1) इति । ***परेष्वैकारोमोजयोः*** (ऋक्प्रा. - 2.18) इति सूत्रेण एकारपरोऽकार ऐकारपरोऽकारश्च ऐकारमापद्यते । यथा – *ऐनं देवासः* > आ एनम् > ऐनम् (ऋ. – 1.123.1) इत्यादयः । ***औकारं युग्मयोः*** (ऋक्प्रा. – 2.19) इति सूत्रेण ओकारपरोऽकार औकारपरोऽकारश्च औकारमापद्यते । यथा – *यत्रौषधी समग्मत* > यत्र ओषधी > यत्रौषधी (ऋक्प्रा. – 10.97.6) इत्यादयः । एते प्रश्लिष्टसन्धयः (ऋक्प्रा. – 2.20) इति ॥

**क्षैप्रसन्धिः (ऋक्प्रा. – 2.21-23) -** स्वरसन्धिषु द्वितीय एव क्षैप्रसन्धिः । पाणिनीयव्याकरणस्य ***इको यणचि***[23] इति सूत्रम् ऋक्प्रातिशाख्यस्य क्षैप्रसन्धेरन्तर्गतम् इति । ***समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम्*** (ऋक्प्रा. – 2.21) इति सूत्रेण अकाराकाराभ्यां विना अन्यानि समानाक्षराणि परे स्थितानि सन्ति, तेषां स्वरवर्णानां स्थाने उच्चारणसाम्यात् अन्तःस्थानां वर्णानामादेशो भवति । यथा – *अभ्यार्षेयं जमदग्निवन्नः* > *अभि आर्षेयम्* > *अभ्यार्षेयम्* (ऋ. – 9.97.51) इत्यादयः । ते क्षैप्राः सन्धयः प्राकृतस्वरोदयाः भवन्ति । क्षैप्रसन्धौ वर्णस्य परिवर्तनं स्यात् । यथा – इ > य्, उ > व्, ऋ > र्, ऌ > ल् इति । तदर्थं सूत्रितं - ***ते क्षैप्राः प्राकृतोदयाः*** (ऋक्प्रा. – 2.23) इति ॥

ऋक्प्रातिशाख्यस्थितः **प्रगृह्यः प्रकृतिभावो वा** विधीयते –

प्रगृह्यं नाम स्वरूपेऽवस्थानम् इति । अर्थात् सन्धौ यदि द्वयोः वर्णयोर्मध्ये सन्धिर्न भूत्वा तौ प्रकृतिरूपेण भवतः तर्हि प्रगृह्यनाम सन्धिर्भवति । महर्षिपाणिनिविरचितं प्रगृह्यविषयकं सूत्रं तु – ***ईदूदेद् द्विवचनं प्रगृह्यम्***[24] इति । आशयो यत् ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञकं स्यात् । यथा – हरी एतौ, विष्णू इमौ, गङ्गे अमू, पचेते इमौ इत्यादयः ।

ऋग्वेदप्रातिशाख्येऽपि आचार्यशौनकः **प्रकृतिभावं** समुपवर्णितवान् **पञ्चदशसूत्रेण** (ऋक्प्रा. – 2.51-65) । तद्यथा –

**प्रकृत्येतिकरणादौ प्रगृह्याः (ऋक्प्रा. – 2.51)** – इतिकरणादौ परभूते प्रगृह्याः प्रकृत्या भवन्ति इति सूत्रस्यास्याशयः । उदाहरणानि – *इन्दो इति*, *शतक्रतो इति*, *ऊँ इति* इत्यादयः ॥

---

[23] पा. – 6.1.101

[24] पा. – 1.1.11

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**स्वरेषु चार्ष्याम् (ऋक्प्रा. – 2.52)** – आर्ष्यां संहितायां स्वरेषु च परभूतेषु प्रगृह्याः प्रकृत्याः भवन्तीति सूत्रस्यास्याशयः । यथा – *राजन्ती अस्य भुवनस्य रोदसी अस्मे* (ऋ. – 6.70.2), *इन्द्रवायू इमे सुताः* (ऋ. – 1.2.4), *ते इद्विप्रा ईळते* (ऋ. – 6.70.4) इत्यादयः । अत्र प्रथमे उदाहरणे राजन्ती – रोदसी इति पदयोः ई-कारः प्रगृह्यः, ई-कारात् परम् अ-कार एव ह्रस्ववर्णः । अत एवात्र प्रकृतिभावो भवतीति आशयः । एवमन्योदाहरणेऽपि दृश्यते ॥

**प्रथमो यथोक्तम् (ऋक्प्रा. – 2.53)** - ***ओकार आमन्त्रितजः प्रगृह्यः*** (ऋक्प्रा. – 1.68) इत्यनेन सूत्रेण आमन्त्रिताज्जातः सम्बन्धजात ओकारः प्रगृह्यसंज्ञको भवति । यथा – *इन्दविन्द्राय मत्सरम्* (ऋ. – 9.26.6), *वाय उक्थेभिर्जरन्ते* (ऋ. – 1.2.2) इत्यादयः । *इन्दविन्द्राय मत्सरम्* (संहितापाठः); *इन्दो इति । इन्द्राय । मत्सरम्* (पदपाठः) । इन्दो-पदस्य ओकार आमन्त्रितजः । प्रथमो यथोक्तम् इति सूत्रेण इन्दविन्द्रायपदे प्रकृतिभावो न भवति, परन्तु ***ओष्ठ्ययोन्योर्भुग्नमनोष्ठ्ये वकारोऽत्रान्तरागमः*** – इति सूत्रेण (ऋक्प्रा. – 2.31) भुग्नसन्धिर्भवति । पदपाठे इति-शब्दोऽस्ति । प्रगृह्यस्य ओ-कारस्य प्रकृत्येतिकरणादौ प्रगृह्याः इति सूत्रेण प्रकृतिभावो भवति । इति-पदस्य इकारेण सह च तस्य सन्धिरपिन भवति । एवमन्यत्रापि दृश्यते ॥

अन्यानि सूत्राणि च – ***सहोदयास्ताः प्रगृहीतपदाः सर्वत्रैव*** (ऋक्प्रा. – 2.54)**,** ***त्र्यक्षरान्तास्तु नेवे*** (ऋक्प्रा. – 2.55), ***आर्ष्यामेव सन्ध्ययकारपूर्वो विवृत्तेश्च प्रत्ययः सन्नुकारः*** (ऋक्प्रा. – 2.56), ***ऊकारादौ स्विति*** (ऋक्प्रा. – 2.57), ***पूषेत्यकारे न चेत्तदेकाक्षरतत्रपूर्वम्*** (ऋक्प्रा. – 2.58), ***श्रद्धा सम्राज्ञी सुशमी स्वधोती पृथुज्रयी पृथिवीषा मनीषा । अया निद्रा ज्या प्रपेति स्वराणां मुख्ये परे पञ्चमषष्ठयोश्च*** (ऋक्प्रा. – 2.59), ***स्वरे पादादा उदये सचेति*** (ऋक्प्रा. – 2.60), ***एकारौकारपरौ च कण्ठ्यौ लुशादर्वाक्*** (ऋक्प्रा. – 2.62), ***गोतमे चामिनन्त*** (ऋक्प्रा. – 2.63), ***विभ्वा विधर्ता विपन्या कदा या मातेत्यूकारेऽप्यपादादिभाजि*** (ऋक्प्रा. – 2.64), ***परुच्छेपे भीषा पथेत्यकारे*** (ऋक्प्रा. - 2.65) इति ॥

एतदतिरिच्यापि ऋक्प्रातिशाख्ये विविधाः सन्धयः सन्ति । तेषां सर्वेषामुल्लेखनमत्र निष्प्रयोजनमिति मन्ये मया ।

वाजसनेयिप्रातिशाख्ये **प्रश्लिष्टसन्धिः** निरूपितः ***इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः*** (शु.प्रा. – 1.116) इति सूत्रेण । अस्मिन्नेव सन्धौ पूर्वं ह्रस्व इकारः, परं च ह्रस्व इकारो स्तः । उभयोर्मेलने ई-कारो भवतीति । यथा – *स्रुचि इ व* > *स्रुची'व घृतम्* (वाज. – 20.70) इति ।

**प्रगृह्यसन्धिः (शु.प्रा. - 1.92-98)** – वाजसनेयिप्रातिशाख्ये प्रगृह्यसन्धि र्विधीयते **सप्तभिः** सूत्रैः । प्रगृह्यो नाम प्रकृतिभाव अर्थात् सन्धिर्यत्र न भवति तदेव प्रगृह्य इति । ***प्रगृह्यम्*** इति सूत्रेण (शु.प्रा. – 1.92)

**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

प्रगृह्यसन्धिर्विहितोऽत्र। प्रगृह्यसन्धिविषयकं सूत्रं तु ***एकारेकारोकारा द्विवचनान्ताः*** (शु.प्रा. – 1.93) इति। आशयो यत् एकार ईकार ऊकार एते द्विवचनप्रतिपादकाः सन्तः प्रगृह्यसंज्ञा भवन्ति। यथा एकारस्य – द्वे इति, शीर्षे इति; ईकारस्य – ऊर्वी इति, पृथ्वी इति। ऊकारस्य – बाहू इति, अध्वर्यू इति। ***ओकारश्च पदान्तेऽनवग्रहः*** (शु.प्रा. – 1.94) इति सूत्रेण पदान्ते वर्तमानः अवग्रहवर्जितः ओकारः प्रगृह्यसंज्ञो भवति। यथा – *अध्वर्यो अद्रिभिः* (वाज. – 20.31) इत्यादयः। अपृक्तः उकारः प्रगृह्यसंज्ञको भवति (**उकारोऽपृक्तः**, शु.प्रा. – 1.95)। यथा – *न वा उ एतत्* (वाज. – 23.16) इति। ***चमू अस्मे त्वे*** इति सूत्रेण (शु.प्रा. – 1.96) चमू अस्मे त्वे एतानि पदानि प्रगृह्यसंज्ञकानि भवन्ति। यथा – *चमू इति चमू > सोममिन्द्र चमूसूतम्, अस्मे इति अस्मे > इन्द्रो अस्मे आरात्, त्वे इति त्वे > बन्धुस्त्वे शयः* इति। मे इत्येतत्पदमुदात्तं चेत्प्रगृह्यसंज्ञं भवति ***मे उदात्तम्*** (शु.प्रा. – 1.97) इति सूत्रेण। यथा – *मे इति मे > मे रायो मा वयम्* (वाज. – 4.22) इति। ***अमी पदम्*** इति सूत्रेण (शु.प्रा. – 1.98) अमी इत्येतत् पदं चेत् प्रगृह्यसंज्ञं भवति। यथा – *अमी इत्यमी > एष वोऽमी राजा* (वाज. – 34.43) इत्यादयः।

एतदतिरिच्यापि वाजसनेयिप्रातिशाख्ये विविधाः सन्धयः सन्ति। तेषां सर्वेषामुल्लेखनमत्र निष्प्रयोजनमिति मन्ये मया।

इदानीं प्रातिशाख्ये स्वरविषयकाः केचिन्नियमाः समुल्लिख्यन्ते -

उदात्तानुदात्तस्वरिताणां वैदिकस्वराणां सत्ता, वैदिकभाषायाः महती विशेषता अस्ति। संहिता-ब्राह्मण-आरण्यक-उपनिषद्भेदेन वेदास्तु चतुर्धा विभज्यन्ते इत्यस्माकं प्राचीनपरम्परा। संहिता खलु ऋग्यजुस्सामाथर्वभेदेन चतुर्धा विभज्यते। अद्यावधिपर्यन्तं समुपलब्धेषु सर्वेषु संहिताग्रन्थेषु स्वरचिह्नाः संलग्ना सन्ति। ब्राह्मणारण्यकयोः तैत्तिरीयब्राह्मणे, शतपथब्राह्मणे, तैत्तिरीयारण्यके, बृहदारण्यके च स्वरचिह्नाः समुपलभ्यन्ते, किन्तु अन्येषु ब्राह्मणेषु, आकरण्यकेषु, उपनिषत्सु वा इमे स्वरचिह्नाः नोपलभ्यन्ते।

स्वरो नाम अक्षरम्। अक्षरमाश्रयीभूतं येषां ते तथोक्ताः। स्वराणाम् अक्षरैः सह धर्मधर्मिसम्बन्धो वर्तते, न तु व्यञ्जनैस्सह। स्वरास्तु त्रिविधा उदात्त-अनुदात्त-स्वरित-भेदेन। तत्र उदात्तस्वरस्य कोऽपि चिह्नो नास्ति। अनुदात्तस्वरस्य चिह्नो वर्णस्य वर्णानां निम्ने वा एकेन रेखारूपेण वर्तते। यथा - क॒, ख॒ इत्यादयः। स्वरितस्वरस्य चिह्नस्तु वर्णस्य वर्णाना वोर्ध्वप्रदेशे एकेन लम्बरेखारूपेण वर्तते। यथा – क॑, ख॑ इत्यादयः।

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

***उच्चैरुदात्तः*** इति सूत्रेण[25] उदात्तस्वरो विहितः। ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽज् उदात्तसंज्ञः स्यात्। ***नीचैरनुदात्तः*** इति सूत्रेण[26] अनुदात्तस्वरो विहितः। ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽज् अनुदात्तसंज्ञः स्यात्। ***समाहारः स्वरितः*** इति सूत्रेण[27] स्वरितस्वरो विहितः। उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्।

स्वरितस्वरविषये (ऋक्प्रा. – 3.3-7) ऋक्प्रातिशाख्ये उक्तम् – ***एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः***[28] इति। उदात्तानुदात्तौ स्वरौ, तयोः स्वरितस्वरो निष्पद्यते। अत एवोक्तम् एकाक्षरसमावेशे सति उदात्तानुदात्तयोः स्वरितस्वरो निष्पद्यते। द्विस्वरभूतस्य स्वरितस्य अर्धमात्रा उदात्तात् उदात्ततरा उच्चार्यते। उतो वा सम्पूर्णस्य स्वरितस्य अर्धभाग उदात्तात् उदात्ततरा उच्चार्यते। स्वरितस्यावशिष्टांशः तथा अनुदात्तांश उदात्तवच्छ्रूयते। स्वरितस्य अनुदात्तांशस्तदा उदात्तवच्छ्रूयते यदा तस्मात् स्वरितात् परमुदात्तः स्वरितो वा न स्यात्।

ऋक्प्रातिशाख्यानुसारेण **स्वरितस्य सप्तप्रकाराः** सन्ति। यथा – **उदात्तपूर्वस्वरितम्** (ऋक्प्रा. – 3.7), **जात्यस्वरितम्** (ऋक्प्रा. – 3.8), **अभिनिहितस्वरितम्** (ऋक्प्रा. – 3.11), **क्षैप्रस्वरितम्** (ऋक्प्रा. – 3.13), **प्रश्लिष्टस्वरितम्** (ऋक्प्रा. – 3.13), **तैरोव्यञ्जनस्वरितम्** (ऋक्प्रा. – 3.17), **वैवृत्तस्वरितम्** (ऋक्प्रा. – 3.17) इति।

**उदात्तपूर्वस्वरितः (ऋक्प्रा. – 3.7) -** ***उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम्*** इति सूत्रेण उदात्तपूर्वस्वरितो विहितः। एकस्मिन्नेव पदे एकमक्षरमुदात्तं वा स्वरितं वा भवति, शेषं तु अनुदात्तम् – अयं तावदुत्सर्गः। एकस्मिन्नेव पदे उदात्तपूर्वं स्वरितमक्षरम् अनुदात्तमिति ज्ञेयम्। सर्वानुदात्तं तु अल्पम्। तथा हि उदात्तैर्वा स्वरितैर्वा पदव्यपदेशः क्रियते। तत्र – इन्द्रः॑, होता॑ इत्यादयः॥

**जात्यस्वरितम् (ऋक्प्रा. – 3.8) -** ***अतोऽन्यत्स्वरितं स्वारं जात्यमाचक्षते पदे*** इति सूत्रेण जात्यस्वरितम् अभिहितम्। एकस्मिन्नेव पदे प्रकृतमुदात्तपूर्वं स्वरितं विना यदि अन्यत्स्वरितं स्वारं वा विद्यते तर्हि तदेव जात्यस्वरितमाचक्षते। किमन्यत्वम् अत्राभिपेतम्? उच्यते अपूर्वत्वं नीचपुर्वत्वं वा। अपूर्वत्वं नाम यत्र पूर्वं कोऽपि स्वरो नास्ति, नीचपूर्वत्वं नाम यत्र स्वरितात् पूर्वम् अनुदात्तं विद्यते। अपूर्वस्योदाहरणम् – स्वः॑, क्व॑, न्यक्॑ इत्यादयः। नीचपूर्वस्योदाहरणं यथा – क॒न्या॑, हृ॒दय्य॑या इत्यादयः। जात्या – स्वरूपेणैव – उदात्तानुदात्तसंगतिं विना इत्यर्थः॥

[25] पा. – 1.2.29, शु.प्रा. – 1.108, तै.प्रा. – 1.38
[26] पा. – 1.2.30, शु.प्रा. – 1.109, तै.प्रा. – 1.39
[27] पा. – 1.2.31, शु.प्रा. – 1.110, तै.प्रा. – 1.40
[28] ऋक्प्रा. – 3.3

IJAMSR
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**अभिनिहितस्वरितम् (ऋक्प्रा. – 3.13) -** अभिनिहितसन्धौ मूलत अकारस्य अभिनिधानो दृश्यते। यथा – सः अयम् > सोऽयम्, पृच्छन्तः अवरासः > पृच्छन्तोऽवरासः इत्यादयः। *ते॑ऽवर्धन्त स्वत॑वसः* (संहितापाठः); *ते। अ व र्ध न्त। स्वऽत॑वसः* (पदपाठः) (ऋ. – 1.85.7) इति। अत्र 'ते' उदात्तः, अवर्धन्त-इति शब्दस्य अ-कार अनुदात्तः । उदात्तानुदात्तयोः सन्धौ ते-इत्यस्य स्वरितस्वरो भवति । एतदेव स्वरितम् अभिनिहितस्वरितमित्युच्यते॥

सर्वेषामेव स्वरितस्वराणामुल्लेखनमत्र निष्प्रयोजनमिति मन्ये मया।

शुक्लयजुर्वेदप्रातिशाख्ये तथा वाजसनेयिप्रातिशाख्येऽपि उदात्तानुदात्तस्वरितस्वराः स्वीकृताः । प्रातिशाख्यस्यास्य समग्रे द्वितीयाध्याये, चतुर्थाध्यायस्य बहुषु सूत्रेषु, षष्ठाध्यायस्य प्रथमतः चतुर्विंशतिपर्यन्तेषु सूक्तेषु स्वराणामालोचना विहिता। प्रातिशाख्यस्याय प्रथमाध्याये स्वरसंख्याविषये आलोचना समुपलभ्यते।

तत्र ***सप्त*** (**शु.प्रा. – 1.127**) इति सूत्रेण सामवेदे षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादान् इति सप्त स्वरान् आहुः । ***त्रीन्*** (**शु.प्रा.- 1.128**) इति सूत्रेण यजुर्वेदे उदात्तानुदात्तस्वरितान् त्रीन् स्वरान् आहुः । ***द्वौ*** (**शु.प्रा. – 1.129**) इति सूत्रेण भाषिकसंज्ञकौ उदात्तानुदात्तौ द्वौ स्वरौ आहुः। ***एकम्*** (**शु.प्रा. – 1.130**) इति सूत्रेण यज्ञकर्मणि तानलक्षणमेकं तथा एकश्रुतिसंज्ञकमेकं स्वरं मन्यन्ते। यजुर्वेदे प्रावचनो विहितः। ***प्रावचनो वा यजुषि*** (शु.प्रा. – 1.132) इति सूत्रं तत्रास्ति। प्रवचनशब्देनार्षपाठ उच्यते। तत्र भव स्वरः प्रावचनः, स एव यजुर्वेदे स्यात् । स च त्रैस्वर्यलक्षण एव । तानो वा यज्ञकर्मणीति विकल्पः । त्रैस्वर्यो नाम उदात्तानुदात्तस्वरितस्वरा इति।

***उच्चैरुदात्तः*** (**शु.प्रा. – 1.108**), ***नीचैरनुदात्तः*** (**शु.प्रा. – 1.109**), ***उभयवान्स्वरितः*** (**शु.प्रा. – 1.110**) इति सूत्रत्रयेण स्वरत्रयं व्याख्यातं प्रातिशाख्येऽस्मिन्। गात्राणाम् आयामेन ऊर्ध्वगमनेन यः स्वरो निष्पद्यते स एवोदात्तस्वरः। गात्राणां मार्दवेण अधोगमनेन यः स्वरो निष्पद्यते स एवानुदात्तस्वरः। उदात्तस्योर्ध्वगमनं गात्राणां प्रयत्नः, अनुदात्तस्याधोगमनं गात्राणां प्रयत्नः। आभ्यां प्रयत्नाभ्यां समाहारीभूताभ्यां यः स्वर उच्चार्यते स एव स्वरितस्वरः।

वाजसनेयिप्रातिशाख्यानुसारेण **स्वरितस्वरः सप्तविधः** । ते एव – **जात्यस्वरितः**, **अभिनिहितस्वरितः**, **क्षैप्रस्वरितः**, **प्रश्लिष्टस्वरितः**, **तैरोव्यञ्जनस्वरितः**, **तैरोविरामस्वरितः**, **पादवृत्तस्वरितः** चेति।

**जात्यस्वरितः (शु.प्रा. – 1.111)** – एकस्मिन् पदे अनुदात्तपूर्वः यकारेण वकारेण सहितः जात्यस्वरः प्रत्येतव्यः। सूत्रं तु ***एकपदे नीचपूर्वः सयवो जात्यः*** इति। नीचपूर्वः अनुदात्तपूर्व इति। यथा – **नीचपूर्वः** –

*कन्या*' इव (वाज. – 17.97) इति। **अपूर्वः** – *स्व'र्देवेषु'* (वाज. – 18.64) इति॥

**अभिनिहितस्वरितः (शु.प्रा. – 1.114) –** एकारौकाराभ्यामुदात्ताभ्याम् परे स्थित अनुदात्तोऽकारो यत्र लुप्यते तत्राभिनिहितस्वरो भवति । सूत्रं ***एदोद्भ्यामकारो लुगभिनिहितः*** इति । यथा – *ते अ प्सरसाम्* (संहितापाठः) > *ते'ऽप्सरसा'म्* (पदपाठः) (वाज. – 24.37) इति॥

हस्तसञ्चालनेन तेषां स्वराणां प्रयोगो व्याख्यातः वाजसनेयिप्रातिशाख्ये । सूत्रितं तु ***हस्तेन ते*** (शु.प्रा. – 1.121) इति। उवटभाष्ये उक्तम् – उदात्ते हस्तस्य ऊर्ध्वगमनं, अनुदात्ते च हस्तस्य अधोगमनं भवति। स्वरिते तु विप्रतिपद्यन्ते । अनन्तभट्टभाष्ये उक्तम् – ***ऊर्ध्वगमनं हस्तस्योदात्ते, अनुदात्तेऽधोगमनम्, स्वरिते तिर्यग्गमनम्*** इति। ***चत्वारस्तिर्यक्स्वरिताः*** (शु.प्रा. – 1.122) इति सूत्रेण जात्याभिनिहितक्षैप्रप्रश्लिष्टा एते चत्वारः स्वरिताः तिर्यग्घस्तं कृत्वा स्वरणीयाः, पितृदानवद्धस्तं कृत्वेति विहितम् । काण्वाचार्यमते यदि पूर्वमनुदात्तं स्यात्तर्हि जात्यादीनामेतेषामुच्चारणं तिर्यग्घस्तं कृत्वा स्वरयितव्याः। उदात्तपूर्वे अपूर्वे च न भवतीति । सूत्रितं तु ***अनुदात्तं चेत् पूर्वं तिर्यङ् निहत्य काण्वस्य*** (शु.प्रा. – 1.123) इति।

उपर्युक्तालोचनात एतदेव वक्तुं शक्यते यत् विविधेषु प्रातिशाख्यग्रन्थेषु सन्धि-स्वर-मन्त्रपाठविषयकाः विविधाः नियमाः दरीदृश्यन्ते। इदानीं, वैदिकमन्त्रा अतीव प्राचीना इत्यत्र कोऽपि संशयो नास्ति। मन्त्राणां लेखनात्पूर्वं ते मन्त्रा ऋषिपरम्परायां ऋषिमनसि विधृता आसन्। वैदिकमन्त्राः खलु अपौरुषेयाः। वैदिकमन्त्राः खलु अमोघाः, अपारशक्तियुक्ताश्चेति मन्यन्ते ऋषयः । मन्त्रोच्चारणसमये अवग्रह-सन्धि-स्वर-मन्त्रपाठादीनां नियमानां पालनमवश्यमेव कर्तव्यम्। यतो हि अस्माभिर्ज्ञायते यत् – ***दुष्टशब्दो स्वरतो वर्णतो वा न मिथ्याप्रयुक्तो न तमर्थमाहुः।***

***स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥*** इति।

लौकिकसंस्कृतं खलु स्वर-मन्त्र-अवग्रहरहितमस्ति । परन्तु सस्वर-मन्त्रविलसितं खलु वैदिकसाहित्यम् । अतएव तेषां मन्त्राणां सुष्ठुतया ज्ञानं ज्ञापनञ्चावश्यमेव कर्तव्यम्। तदर्थं प्रातिशाख्यानां आवश्यकता अस्ति। वैदिकसाहित्ये तेषां प्रातिशाख्यानां प्रभावः प्रयोजनं चापरिमितमिति निश्चप्रचं वक्तुं युज्यत इति।

**उपसंहारः -**

अस्ति वैदिकवाङ्मये प्रातिशाख्यसाय महत्तवपूर्णस्थानम्। प्रतिचरणस्य संहितानां सम्यगवबोधनार्थं शास्त्रस्यास्य ज्ञानमपरिहार्यम् । वैदिकध्वनिविज्ञानस्य क्षेत्रेऽप्यस्य महत्त्वपुर्णं योगदानम् । संहितापदविषयकं विधानमस्य शास्त्रस्य मुख्यविषयः । पदानां सन्धिभिस्संहिता निष्पद्यत इत्यस्य सिद्धान्तः । संहितासु प्रयुक्तानां पदानां

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

मूलस्वरूपं सम्यगवबोधयितुं तच्चरणस्य पदपाठविषयकानि विधानान्यपि विहितानि । वर्ण एव पदानां मूलघटकः । अत एवात्र चरणविशेषस्य संहितासु प्रयुक्ता वर्णाः तेषामुच्चारणपरक्रिया चोपदिष्टा अत्र । उदात्तादयः स्वराः वैदिकभाषायाः प्रधानवैशिष्ट्यम् । संहितागतमन्त्राणामभीष्टार्थनिर्धारणाय स्वराणामत्यधिकमुपादेयत्वं सिद्धमेव। अस्तु, स्वरविषयकविधानञ्चाप्यत्र निर्दिष्टं विद्यते अत्र प्रातिशाख्येषु।

वैदिकवाङ्मये ये खलु प्रातिशाख्यग्रन्थाः सन्ति तेषां सर्वेषामुल्लेखोऽत्र गवेषणापत्रे कृतं मया। अपि च तेषां विषयोऽपि अत्रोल्लिखिताः सन्ति। न केवलं विषया अपि तु वैदिकवाङ्मये तेषां प्रातिशाख्यानां प्रयोजनमप्यत्र गवेषणापत्रे यथामति सोदाहरणं विहितं मया । मन्ये, नवीनाः छात्राः गवेषणापत्रेनानेन प्रातिशाख्यविषये सम्यज्ज्ञानं लब्धुं शक्नुवन्तीति ॥

**शब्दसंक्षेपसूची -**

अ. – अथर्ववेदः
ऋक्प्रा. – ऋक्प्रातिशाख्यम्
चतु. – चतुरध्यायिका
तै.प्रा. – तैत्तिरीयप्रातिशाख्यम्
पा. – पाणिनिः
पा.शि. – पाणिनीयशिक्षा
मुण्ड. – मुण्डकोपनिषत्
वंश. – वंशब्राह्मणम्
शु.प्रा. – शुक्लयजुर्वेदप्रातिशाख्यम्
साम. – सामसर्वानुक्रमणी

**ग्रन्थपञ्जी –**

*अक्षरतन्त्रम्,* सामवेदीयप्रातिशाख्यम् सवृत्तिकम्। श्रीकृष्णः शर्मा। कुरुक्षेत्रम् : निर्मल वुक एजेन्सी, 2010, संशोधित-परिवर्द्धितसंस्करणम्।

*अथर्ववेदप्रातिशाख्य शौनकीया चतुरध्यायिका* वा। विलियम डी. व्हिटनि। द चौखम्बा सान्सक्रिट् स्टाडिज, विंशति भागः। वाराणसी : द चौखम्बा सान्सक्रिट् सिरिज अफिस, 1962, द्वितीयसंस्करणम्।

*अथर्ववेदप्रातिशाख्य तथा वाजसनेयिप्रातिशाख्य का तुलनात्मक अध्ययन*। बीना जलोटे। वाराणसी : न्यु साकेत कालोनी, २००२.

*अथर्ववेदीया चतुरध्यायिका,* श्रीमत्कौतस्याकार्यकृता। निर्मलाभाष्योपेता शशिकला-हिन्दीव्याख्यया च विभूषिता। सम्पा. – जमुनापाठकः। वाराणसी : वाणी मन्दिर, नई सडक, 1998.

*अष्टाध्यायी*। चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता। मदर्षि-पाणिनिः। व्याख्याकारः- ईश्वरचन्द्रः। प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०३, दिल्लीः चोखम्बा संस्कृत प्रतिष्ठान, २००४.

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

*ऋक्तन्त्रम्*, समीक्षात्मकं सम्पादितम्। सम्पा. सूर्यकान्तः। दिल्ली : मेहरचन्द लछमन्दास, 1970.

*ऋग्वेदप्रातिशाख्यम्*, उवट-भाष्य-सहितम्। सम्पा. सिद्धेश्वर-भट्टाचार्यः। काशी हिन्दू विश्वविद्यालय संस्कृत ग्रन्थमाला। शोध-प्रकाशन-योजना। पञ्चम-पुष्पः, वाराणसी : काशी हिन्दू विश्वविद्यालय शोध-प्रकाशन, १९३०।

*ऋग्वेदप्रातिशाख्यम्*, उवट-भाष्य-सहितम्। सम्पा. मङ्गलदेव-शास्त्री। एलाहवाद : द्य इण्डियान प्रेस लिमिटेड, 1931.

*ऋग्वेदप्रातिशाख्यम् शौनकविचरितम्*। *पशुपतिशास्त्रिकृतटीकासमेतम्*। सम्पादकोऽनुवादको व्याख्याकारश्च : अमरकुमार चट्टोपाध्यायः। कोलकाता : संस्कृत पुस्तक भाण्डार, २००८।

*ऋग्वेगप्रातिशाख्य*। पटल १ – ४। व्याख्याकार – व्रजबिहारी चौवे। दिल्ली : भारतीय विद्या प्रकाशन, १९८६।

*तैत्तिरीयप्रातिशाख्यम्*, सोमयार्यविरचित-त्रिभाष्यरत्नाख्यव्याख्यया गार्ग्यगोपालयज्वविरचित-वैदिकभरणाख्य-व्याख्याया च सहितम्। सम्पादकौ - आर् श्यामशास्त्री-के.रङ्गाचार्यौ। दिल्ली : मोतीलाल बनारसी दास, १९८५ (पुनर्मुद्रितसंस्करणम्)।

*पुष्पसूत्रम्* नाम सामवेदीयप्रातिशाख्यम्। जि.एच्.तारलेकरः। प्रथम-द्वितीयभागः। कलामूलशास्त्र-ग्रन्थमाला – 33. आई.जि.एन्.सि.ए, न्यु दिल्ली; मोतिलाल बनारसी दास पबलिशर्स प्राईभेट लिमिटेड, दिल्ली च, 2001.

*शुक्लयजुःप्रातिशाख्यम्*, कात्यायनमहर्षिप्रणीतम्, उवटभाष्यसहितम्। सम्पा. युगलकिशोरपाठकः। वेनारस सान्सक्रिट सिरिज। ए कलकशन अव सान्सक्रिट वार्कस। संख्या – 8,10,18,21,26. वेनारस, 1883.

*शुक्लयजुःप्रातिशाख्यम् अथवा वाजसनेयि-प्रातिशाख्यम्*, भाष्यद्वयसहितम्। सम्पा. वीरेन्द्र-कुमार-वर्मा। वाराणसी : ज्ञानप्रकाश प्रतिष्ठान, 1975.

*शुक्लयजुःप्रातिशाख्यम् अथवा वाजसनेयि-प्रातिशाख्यम्*, भाष्यद्वयसहितम्। सम्पा. वीरेन्द्र-कुमार-वर्मा। व्रजजीवन प्राच्यभारती ग्रन्थमाला 16। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, पुनर्मुद्रितसंस्करणम्, 1987.

*शौनकीय ऋग्वेगप्रातिशाख्य* (प्रथमतश्चतुर्थपटलं यावत्, षोडशपटलञ्च)। सम्पा.- तारकनाथ अधिकारी। कोलकाता : संस्कृत वुक डिपो, २००७.

.........................................................................................